भुजः ॥६६॥ ते तत्र चंद्रसेनेन प्रत्युत्थायाभिपूजिताः ॥ महार्हविष्टरगताः प्रत्य
नंदन्सुविस्मिताः ॥६७॥ गोपसूनोः प्रसादाय प्रादुर्भूतं शिवालयं ॥ लिंगं च वी
क्ष्य सुप्रीताः शिवे चक्रुः परां मतिं ॥६८॥ तस्मै गोपकुमाराय प्रीतास्ते सर्वभू
भुजः ॥ वासो हिरण्यरत्नानि गोमहिष्यादिकं धनं ॥६९॥ गजानश्वान्रथान्रौक्मान्

छत्रोपानत्परिच्छदान् ॥ दासान्ग्रामाननेकांश्च ददुः शिवकृपार्थिनः ॥ ये ये
सर्वेषु देशेषु गोपास्तिष्ठंति भूरिशः ॥ तेषां तमेव राजानं चक्रिरे सर्वपार्थिवाः
॥६९॥ अथास्मिन्नंतरे सर्वैस्त्रिदशैरभिपूजितः ॥ प्रादुर्बभूव तेजस्वी हनुमान्वा
नरेश्वरः ॥७०॥ तस्मान्निगमनादेव राजानो राजसत्तमाः ॥ प्रत्युत्थाय नमस्कृ
त्य नम्रात्ममूर्तयः ॥७१॥ तेषां मध्ये समासीनः पूजितः प्लवगेश्वरः ॥ गोपात्मजं
समाश्लिष्य राज्ञो वीक्ष्येदमब्रवीत् ॥७२॥ सर्वे शृणुत भद्रं वो राजानो ये च देहिनः ॥ शि
वपूजासु ते नान्यागतिर्नास्ति कदाचन ॥७३॥ एष गोपसुतो दृष्ट्वा प्रदोषे मंदवा
सरे ॥ अमंत्रेणापि संपूज्य शिवं शिवमवाप्तवान् ॥७४॥ मंदवारे प्रदोषोयं दुर्लभः सर्व

देहिनां।तत्रापिदुर्लभस्तस्मिन्कृष्णपक्षेसमागते।७५।एषपुण्यतमोलो
केगोपानांकीर्त्तिवर्द्धनः।अस्यान्वयेचयेजातातेमहात्मोगभोगिनः।७६।अ
स्यवंशेष्टमेभावीनंदोनाममहायशाः।प्राप्यतेयस्यपुत्रत्वंकृष्णोनारायणः
स्वयं।७७।अद्यप्रभृतिलोकेस्मिन्वृषगोपकनंदनः।नाम्नाश्रीकरइत्युच्चैर्लो
केख्यातिंगमिष्यति।७८॥ ॥सूतउ०॥ ॥एवमुक्त्वांजनिःपुत्रस्तस्मैगोपक
सूनवे।उपदिश्यपन्नीवाचारंतत्रैवांतर्निगतः।७९।तेउसर्वेमहीपालाःसंस्
थ्यप्रतिपूजिताः।चंद्रसेनंसमामंत्र्यप्रतिजग्मुर्यथासुखं।८०।श्रीकरोपिमहा
तेजाउपदिष्टोहनूमता।ब्राह्मणैःसहधर्मात्माचक्रेशंभोःसमर्हणं।८१।का

लोनश्रीकराख्योपिचंद्रसेनश्चभूपतिः।समाराध्यशिवंभक्त्यातावापतुःपर
मंपदं।८२।इदंपवित्रंपरमंरहस्यंयद्यास्ककरंपुण्यमहर्द्धिवर्द्धनं।आख्यानमा
ख्यातमघौघनाशनंगौरीशपादांबुजभक्तिवर्द्धनं।८३॥ ॥इतिश्रीस्कंदपुरा
णेब्रह्मोत्तरखंडेचंद्रसेनोपाख्यानेपंचमोध्यायः॥ ॥ऋषयऊचुः॥ ॥यदुक्तं
भवतासूतमहदाख्यानमुत्तमं।शंभोर्माहात्म्यकथनमशेषाघहरंपरं।१।
भूयापिश्रोतुमिच्छामस्तद्वसुसमाहितः।प्रदोषेभगवान्शंभुःपूजितस्तुम
हात्मभिः।२।संप्रयच्छतिकांसिद्धिमेवंनोब्रूहिसुव्रत।श्रुतमप्यसकृत्सूतनःसम
स्तात्प्रवर्त्तते।३।सूतउ०॥ ॥साधुसाधुमहाप्राज्ञाभवद्भिर्लोकविश्रुतैः।तत्रप्र

ज्योमहादेवोनान्योदेवःफलार्थिभिः॥४॥प्रदोषपूजामाहात्म्यंकोनुवर्णयि
तुंक्षमः॥यत्रसर्वेपिविबुधास्तिष्ठंतिगिरिशांतिके॥५॥अथपूजाजपोहो
मस्तत्कथास्तद्गुणस्तवः॥कर्तव्योनियतंमर्त्यैश्चतुर्वर्गफलार्थिभिः॥६॥
दारिद्र्यपरमांधानामिदंहिपरमांजनं॥भवसागरमग्नानांप्लवोयंपार
दर्शनं॥७॥दुःखशोकभयार्त्तानांक्लेशनिर्वाणकारणं॥प्रदोषेपार्वतीश
स्यपूजनंमंगलायतनं॥८॥दुर्बुद्धिरपिवानीचोपिमंदभाग्योशठोपिवा॥प्रदो
षेपूज्यदेवेशंविपद्भ्यःसंप्रमुच्यते॥९॥शत्रुभिर्हन्यमानोपिदश्यमानोपिप
न्नगैः॥शैलेनाक्रम्यमाणोपिपतन्नपिमहांबुधौ॥१०॥आविद्धकालदंडोपि

नानारोगहतोपिवा॥नविनश्यतिमर्त्योसौप्रदोषेगिरिशार्चनात्॥११॥दारि
द्र्यमरणंदुःखंऋणपारंनगोपमं॥सद्योविधूयसंपद्भिर्युज्यतेशिवपूजना
त्॥१२॥अत्रवक्ष्येमहापुण्यमितिहासंपुरातनं॥यंश्रुत्वामनुजाःसद्यःप्रयांति
कृतकृत्यतां॥१३॥आसीद्विदर्भविषयेनाम्नासत्यरथोनृपः॥सर्वधर्मरतोधी
रःसुशीलःसत्यसंगरः॥१४॥तस्यपालयतोभूमिंधर्मेणमुनिपुंगवाः॥व्यतीया
यमहान्कालःसुखेनैवमहामते॥१५॥अथतस्यमहीभर्तुःशात्रवःशाल्वभू
जः॥बभूवुरुद्धतफलाद्दुर्मर्षणपुरोगमाः॥१६॥कदाचिदथतेशाल्वाःसन्नद्धा
बहुसैनिकाः॥विदर्भनगरींप्राप्यरुरुधुर्विजिगीषवः॥१७॥दृष्ट्वासंरुध्यमाना

श्रस्तो०
३९

स्वां विदर्भाधिपतिः पुरीं ॥ योद्धुमभ्युद्ययौ तूर्णं बलेन महताऽन्वितः ॥१८॥ तस्यै
रन्नव घुरुंधा शाल्वै रतिमहोत्कटैः ॥ पाताले पन्नगैः सार्द्धं गंधर्वैरिव दुर्मदैः ॥
१९॥ विदर्भनृपतिः सोऽथ कृत्वा युद्धं सुदारुणं ॥ स भग्नष्टबलः शाल्वैर्निहि
तो रणमूर्द्धनि ॥२०॥ उद्रुवुः समरे भग्ना हतशेषाः सुसैनिकाः ॥ अथ युद्धे
सुविरते नष्टसुपुरमंत्रिषु ॥२१॥ नगर्यां युरुमानायां जाते कोलाहले रवात
स्य समरथस्यैका विदर्भनृपतेः सती ॥२२॥ भूयः शोकसमाविष्टा कंचिद्यत्ना
द्वहिर्ययौ ॥ सा निशासमये यत्नाद्दंतवक्त्री नृपांगना ॥२३॥ निर्गता शोकसं
तप्ता प्राचीं उग्र ययौ दिशां ॥ अथ प्रभाते मार्गेण गच्छंती श्रानकैः सती ॥२४॥ अ ३९

तीत्य दूरमध्वानं ददर्श विमलं सरः ॥ तत्रागत्य वरारोहा तसतापेन भूयसा ॥
२५॥ निवासार्थं सरस्तीरे छायावृक्षमुपाश्रयत् ॥ तत्रैव दैववशाज्जाता विजने स
रुकुद्दिमा ॥२६॥ असूत तनयं साध्वी मुहूर्ते सगुणान्विते ॥ अथ सा राजमहि
षी पिपासाभिहिताऽऽतुरा ॥२७॥ सरोऽवतीर्णा सौ राज्ञी ग्रस्ता ग्राहेण भूयसा ॥
जातमात्रः कुमारोऽपि विनष्टपितृमातृकः ॥२८॥ रुरोदोच्चैः सरस्तीरे क्षुत्पिपासा
तुरोऽबलः ॥ तस्मिन्नेव क्रंदमाने जातमात्रकुमारके ॥२९॥ काचिद्न्याययो श्री
अं दृष्ट्वा विप्रवरांगना ॥ साप्येकहायनं बालमुद्वहंती निजात्मकं ॥३०॥ अंगना भ
र्तृरहिता याचमाना गृहे गृहे ॥ एकात्मजा बंधुहीना याच्यामार्ग विनांगता ॥३१॥

श्लो०
५०

उमानामद्विजसती ददर्श नृपनंदनं ॥ सा दृष्ट्वा राजतनयं सूर्यबिंबमिवच्यु
तं ॥ ३२ ॥ अनाथमेकं क्रीडंतं चिंतयामास भूरिशः ॥ अहो सुमहदाश्चर्यमिदं दृ
ष्टं मयाधुना ॥ ३३ ॥ अछिन्ननाभिसूत्रोयं शिशुर्माता क्व वा गता ॥ पिता नास्ति
च नाथोस्ति नास्ति बंधुजनोपि वा ॥ ३४ ॥ अनाथः कृपणो बालः शेते केवलभू
तले ॥ एष चंडालजो वाथ शूद्रजो वैश्यजोपि वा ॥ ३५ ॥ विप्रात्मजो वा नृपजो ज्ञाय
ते कथमर्भकः ॥ शिशुमेनं समुद्धृत्य पुष्णाम्यौरसवद्धिया ॥ ३६ ॥ किंत्वनस्ताय
कुलजं नोत्सहे स्प्रष्टुमुत्तमा ॥ इति मीमांसमानायां तस्यां विप्रवरस्त्रियां ॥ ३७ ५०
कश्चित्समाययौ भिक्षुः साक्षाद्देवः शिवः स्वयं ॥ तामाह भिक्षुवर्यो थ विप्रमानि

नि मा खिद ॥ ३८ ॥ रक्षैनं बालकं सुभ्रू विसृज्य हृदि संशयं ॥ एतावदुक्त्वा त्वरितो
भिक्षुः कारुणिको ययौ ॥ ३९ ॥ अथ तस्मिन्गते भिक्षौ विश्रब्धा विप्रभामिनी ॥ तमर्भ
कं समादाय निजमेव गृहं ययौ ॥ ४० ॥ भिक्षुवाक्येन विश्रब्धा सा राजतनयं सती ॥
आत्मपुत्रेण सह शुश्रूषया पर्यतोषयत् ॥ ४१ ॥ एकचक्राह्वये रम्ये ग्रामे कृत
निकेतना ॥ स्वपुत्रं राजपुत्रं च भिक्षान्नेन व्यवर्धयत् ॥ ४२ ॥ ब्राह्मणीतनयश्चैव स
राजतनयस्तथा ॥ ब्राह्मणैः कृतसंस्कारौ ववृधाते सुपूजितौ ॥ ४३ ॥ कृतोपन
यनौ काले बालकौ नियमे स्थितौ ॥ भिक्षान्नं चरतुस्तत्र मात्रा सह दिने दिने ॥ ४४ ॥
ताभ्यां कदाचिद्बालाभ्यां सा विप्रवनिता सह ॥ भैक्ष्यं चरंती दैवेन प्रविष्टा देवल

नयं।४५।तत्र वृन्दैः समाकीर्णे मुनिभिर्देवतालये।तौ दृष्ट्वा बालकौ धीमान्
शांडिल्यो मुनिरब्रवीत्।४६।अहो दैवबलं चित्रमहो कर्म दुरत्ययं।एष बालो
स्य जननी भ्रितो नैःस्पेण जीवति।४७।इमामेव द्विजवधूं प्राप्य मातरमुत्तमां।
सहैव द्विजपुत्रेण द्विजभावं समाश्रितः।४८।इति श्रुत्वा मुनेर्वाक्यं शांडिल्य
द्विजन्मनः।सा ब्राह्मणी सभामध्ये पर्यपृच्छत्सविस्मया।४९।ब्रह्मन्नेषोर्भको
नीतो मया त्रिह्वो गिरा गृहं।अविज्ञातकुलेवापि सुतवत्संविपुष्यते।५०।क
स्मिन्काले प्रसूतोयं का माता जनकोस्य कः।सर्वं विज्ञातुमिच्छामि भवतो ज्ञान
चक्षुषः।५१।इति पृष्टो मुनिः सोथ ज्ञानदृष्टिर्द्विजस्त्रिया।आचष्टे तत्सबालस्य जन्म

कर्म च पौर्विकं।५२।विदर्भराजपुत्रत्वं तत्पितुः संगरे मृतिं।तन्मातुर्नक्रग्रहणं
साकल्येनन्यवेदयत्।५३।अथ सा विस्मिता नारी पुनः पप्रच्छ तं मुनिं।स रा
जा सकलान्भोगान्हित्वा युद्धे कथं मृतः।५४।दरिद्रमस्य बालस्य स्यान्निका
भेनैव जीवतः।दारिद्र्यनाशनोपायमुपदेष्टुं त्वमर्हसि।५५।शांडिल्य उ०॥ ॥अ
मुष्य बालस्य पिता स विदर्भमहीपतिः।पूर्वजन्मनि पांड्योसौ बभूव नृपसत्त
मः।५६।स राजा सर्वधर्मज्ञः पालयन्सकलां महीं।प्रदोषसमये त्वेकदाचिन्म
यपूजयन्।५७।तस्य पूजयतो भक्त्या देवं त्रिभुवनेश्वरं।आसीत्कलकलारावः स
र्वत्र नगरे महान्।५८।श्रुत्वा तमुत्कटं राष्ट्रं राजा त्यक्त्वा शिवार्चनं।निर्ययौ राजम

वनान्नगरं त्यक्तो नन्नांकया।।५०।। स तस्मिन्नेव समये तस्मा मासमहाबला
गृहीतराष्ट्रसामंतो राजांतिकमुपाययौ।।६०।। अमात्येन समानीतं शत्रुसा
मंतमुद्यतं दृष्ट्वा क्रोधेन नृपतिः शिरश्छेदमकारयत्।।६१।। स तथैव महीपा
लो विसृज्य शिवपूजनं। असमाप्तात्मनियमश्चकार निशि भोजनं।।६२।। त
त्पुत्रोपि तथा चक्रे प्रदोषसमये शिवं। अनर्चयित्वा मूढात्मा भुक्त्वा सुष्वाप
दुर्मदः।।६३।। जन्मांतरे स नृपतिः विदर्भे क्षितिपोऽभवत्। शिवार्चनांतरायेण
परैर्भोगांतरे हतः।।६४।। तत्सुतोयं पूर्वभवे सोऽस्मिन्जन्मनि तत्सुतः। भूत्वा
दारिद्र्यमापन्नः शिवपूजाव्यतिक्रमात्।।६५।। अस्य माता पूर्वभवे सपत्नीं छद्म

नाहनत्। तेन पापेन महता ग्राहेणास्मिन्भवे हता।।६६।। एषा प्रवृत्तिरेते
षां भवेह परिकीर्तिता। अनर्चितशिवा मर्त्याः प्राप्नुवंति दरिद्रतां।।६७।। सत्यं ब्र
वीमि परलोकहितं ब्रवीमि सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि। संसारमुल्बण
मसारमवाप्य जंतोः सारोयमीश्वरपदांबुजयुगस्य सेवा।।६८।। ये नार्चयंति गिरि
शं महति प्रदोषे ये नार्चितं शिवपदं प्रणमंति नान्ये। येतत्कथां श्रुतिपुटैर्न पि
बंति मूढास्ते जन्म जन्मसु भवंति नरा दरिद्राः।।६९।। ये वै प्रदोषसमये परमेश्वरस्य
कुर्वंत्यनन्यमनसोंघ्रिसरोजपूजां। नित्यं प्रवृद्धधनधान्यकलत्रपुत्रसौभाग्य
संपदधिकास्त इहैव लोके।।७०।। कैलासशैलभवने त्रिजगज्जनित्रीं गौरीं निवेश्य

ब्रह्मो०
४३

कनकाचितपीवमध्येनृत्यंविधातुमभिवांछतिशूलपाणौदेवाःप्रदोषस
मयेनुभजंतिसर्वे॥७१॥वाग्देवीधृतवल्लकीशतमखोवेणुंदधत्पद्मजः
स्तालोन्निद्रकरोमहाभगवतीगेयप्रयोगान्विता॥विष्णुःसांद्रमृदंगवा
दनपटुर्देवाःसमंतात्स्थिताः।सेवंतेतमनुप्रदोषसमयेदेवंमृडानीपतिं॥७२॥
गंधर्वयक्षपतयोरगसिद्धसाध्यविद्याधरामरवराप्सरसांगणाश्च।येन्येत्रि
लोकनिलयाःसहभूतवर्गाःप्राप्तेप्रदोषसमयेहरपार्श्वसंस्थाः॥७३॥अतः
प्रदोषसमयेशिवएकएवपूज्योथनान्योहरिपद्मजाद्याः।तस्मिन्महेशे
विधिनेज्यमानेसर्वेप्रसीदंतिसुराधिनाथाः॥७४॥एषतेतनयःपूर्वजन्मनि

ब्राह्मणोत्तमः।प्रतिग्रहैर्वयोनिन्येनयज्ञाद्यैःसुकर्मभिः॥७५॥अतोदारिद्र्य
मापन्नःपुत्रस्तेद्विजभामिनि।तद्दोषपरिहारार्थंशरणंयातुशंकरं॥७६॥
॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेषष्ठोध्यायः॥ ॥सूतउ०॥ ॥इत्युक्ता
मुनिनासाध्वीसाविप्रवनितापुनः।तंप्रणम्याथपप्रच्छशिवपूजाविधिंक्रमं
॥शांडिल्यउ०॥ ॥पक्षद्वयेत्रयोदश्यांनिराहारोभवेद्दिवा।घटित्रयादस्तमया
त्पूर्वंस्नानंसमाचरेत्॥२॥शुक्लांबरधरोभूत्वावाग्यतोनियमान्वितः।कृतसं
ध्याजपविधिःशिवपूजांसमारभेत्॥३॥देवस्यपुरतःसम्यगुपलिप्यनवांभ
साविधायमंडपंरम्यंधौतवस्त्रादिभिर्बुधः॥४॥वितानाद्यैरलंकृत्यफलपुष्पन

डाक्टर भाऊदाजीइत्याख्यस्य स्मारकम्
Dr. BHAU DAJI MEMORIAL
४३
डाक्टर भाऊदाजीइत्याख्यस्य स्मारकम्
Dr. BHAU DAJI MEMORIAL

ब्रह्मो.
५५

वांकुरैः॥ विचित्रं पद्ममुद्भूतं वर्णपंचकरंजितं॥५॥ तत्रोपविष्टः शुद्धात्मा जितेंद्रि
यः स्थिरासनः॥ सम्यक् संपादिताशेषपूजोपकरणः शुचिः॥६॥ आगमोक्तेन
मंत्रेण आगमे नच मंत्रयेत्॥ ततः कृत्वात्मशुद्धिं च भूतशुद्धिमनुक्रमात्॥७॥
प्राणायामत्रयं कुर्यात् बीजमंत्रैः सबिंदुकैः॥ मातृकान्यासविधिवत् ध्यात्वा
तां देवतां परां॥८॥ समाप्य मातृकां न्यासं ध्यात्वा चैव परं शिवं॥ वामभागे गुरुं न
त्वा दक्षिणे गणपं नमेत्॥९॥ अंसयोर्मुनिधर्मादीन् न्यसेज्ज्ञानौ च पार्श्वयोः॥ अ
तो धर्मादिननंतादि स्तदिपार्श्वे मनुं न्यसेत्॥१०॥ आधारशक्तिमारभ्य ज्ञानात्मा ५५
नमनुक्रमात्॥ उक्तक्रमेण विन्यस्य कृत्वा मेसो धुनावितो॥११॥ नवशक्तिमये

रम्ये ध्यायेद्देवमुमापतिं॥ चंद्रकोटिप्रतीकाशं त्रिनेत्रं चंद्रभूषणं॥१२॥ आपिंग
लजटाजूटं रत्नमालाविराजितं॥ नीलग्रीवमुदारांगं तारहारोपशोभितं॥१३॥ व
रदाभयहस्तं च हरिणं च परश्वधं॥ दधानं नागवलयं केयूरांगदमुद्रिकां॥१४॥
व्याघ्रचर्मपरीधानं रत्नसिंहासने स्थितं॥ ध्यात्वा तद्वामभागे च चिंतयेद्गिरि
कन्यकां॥१५॥ जपाकुसुमसंकाशां उद्यदर्कसमप्रभां॥ विद्युत्पुंजप्रभां लंबी
मनोनयननंदिनीं॥१६॥ बालेंदुशेखरां स्निग्धां नीलकुंचितकुंतलां॥ भृंगसंघातरुचिर कुंचित
नीलालकविराजितां॥१७॥ मणिकुंडलविद्योतन्मुखमंडलविभ्रमां॥ नवकुंकुमपं
कांककपोलतलदर्पणां॥१८॥ मधुरस्मितविभ्राजदरुणाधरपल्लवां॥ कंबुकं

ब्रह्मो०
४५

गौरीं वामुद्यकुचपंकजकुड्मलां ।१९। पाशांकुशाभयवरैर्विलसंतीं चतु
र्भुजां । अनेकरत्नविलसत्कंकणांगदमुद्रिकां ।२०। त्रिवलीवलयांमध्ये हेमकां
चीगुणचित्रितां । दिव्यमाल्यांबरधरां दिव्यचंदनचर्चितां ।२१। दिक्पालवंदि
तां मौलिसंलग्नांघ्रिसरोरुहां । रत्नसिंहासनारूढां सर्वराजपरिच्छदां ।२२।
एवं ध्यात्वा महादेवं देवीं च गिरिकन्यकां । न्यासक्रमेण संपूज्य देहे गंधादि
भिः क्रमात् ।२३। पंचभिर्ब्रह्मभिः कुर्याद्विप्रोक्तस्थानेषु बाहुदिष्टथकुपुष्पां ४५
जलिं देहे मूलेव चंद्रादित्रिधा ।२४। पुनः स्वयं शिवो भूत्वा मूलमंत्रेण साधकः ।
ततः संपूजयेद्देवं आत्मपीठे पुनः पुनः ।२५। संकल्प्य प्रजपेत्तत्र पूजारंभे समाहितः ।

कृतांजलिपुटो भूत्वा चिंतयेद्धृदि शंकरं ।२६। नानापातकदुर्गेषु दारिद्र्यवि
निवर्तिषु । अशेषाघविनाशाय प्रसीद मम शंकर ।२७। दुःखशोकाग्निसंसा
रनिमग्नं भयपीडितं । बहुरोगाकुलं दीनं पाहि मां वृषवाहन ।२८। आगच्छ दे
व देवेश महादेव भयंकर । गृहाण सह पार्वत्या त्वत्पूजा मया कृता ।२९। इति
संकल्प्य विधिवद्ब्रह्मा पूजां समारभेत्तु । गुरुं गणपतिं वैश्च यजेत्सव्यापसव्य
योः ।३०। क्षेत्रेशामीशाकोणे च वह्निकोणे सायं नीयजेत्तु । धर्मं ज्ञानं च वैराग्यमैश्व
र्यं च नमोंतकैः ।३१। स्वरैरग्न्यादिकोणेषु पीठपादमनुक्रमात् । आभ्यां च वि
पुसर्गत्साम धर्मादि हि पूजयेत् ।३२। मातृरूपाश्चतुर्दिक्षु मध्येनंतं सतारकं ।

ब्रलो० ४६ सत्वादीस्त्रिगुणांस्तंतुलतः पीठेषु विन्यसेत्॥३३॥ अंतरूर्ध्वच्छदे मायां विद्या
लक्ष्मीं मोहिनीं वेन्नवा। तद्दलचाम्बुजं न्यूनं यः सकलमंडलत्रयं॥३४॥ पत्रकेसरकिं
जल्कव्याप्तं तारारूपं वैक मातृका॥ आत्मत्रयसमन्वितं अभ्यर्चयेत् मंडलमादरात्॥
३५॥ हृदि बीजत्रयाद्यैर्न्यस्तं लक्ष्मीं वरेण्डीं च गानगाद्यैर्हृदि स्थपूजयेत्॥ वा
माद्यानवशक्तीर्विनिवस्वरयुतो यजेत्॥३६॥ हृदि बीजत्रयाद्येन पावमंत्रे
ण चार्चयेत्॥ आवृत्तिः प्रथमा गेस्क पंचभिर्मूर्तिभिः क्रियाभिः॥३७॥ त्रिशक्तिभिस्त ४६
र्तिभिश्चान्यानि दिव्यसमन्विते॥ अनंताद्यैः पराद्यो न्यामातृभिश्च हृष्टा
दिभिः॥३८॥ सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्च तथा बुधैः॥ वृषभनंदेत्र चंडीशौ दु

र्गा विस्कंदनंदिनौ॥३९॥ सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्च तथा बुधैः॥ वृषनंदेत्रौ
गणेशाः सैन्ययोश्चैव स्वस्वलक्षणलक्षिताः॥ अणिमा महिमा चैव गरिमा लघिमा
तथा॥४०॥ ईशित्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च॥ अष्टैश्वर्याणि चोक्तानि तेजो
रूपाणि केवलं॥४१॥ पंचभिर्ब्रह्मभिः पूर्वं रुद्रैरवाद्यानि रप्यन्तु॥ अंगैरुमाद्यैरि
न्द्राद्यैरिंद्राद्यैः पूजोक्तामुनिभिस्तुतैः॥४२॥ उमामहेश्वरादींश्च पूजयेदुत्तरादितः॥
मया मायावकैर्युक्तं तेजोरूपं सदाशिवं॥४३॥ उमया सहितं देवमुपचारैः प्रपूजये
त्॥ सुप्रतिष्ठितलिंगं च स्वतीर्थैः पंचामृतैरपि॥४४॥ अभिषिञ्च महादेवं रुद्रसूक्तैः
समाहितः॥ कल्पयेद्विविधैर्मंत्रैर्नामभिरुपचारकान्॥४५॥ नामभिः कल्पयेद्देवं स्वा

गतेविहितांजलिः। अर्घ्यमष्टगुणोपेतंपाद्यंशुद्धोदकेनतु।४६। तेनैवाचमनं
दद्यान्मधुपर्कमथोत्तरं। पुनराचमनंदत्वास्नानंमंत्रैःप्रकल्पयेत्।४७। उपवी
तंतथावासोभूषणानिनिवेदयेत्। गंधमष्टांगसंयुक्तंश्रियायविनिवेदयेत्।
।४८। ततश्चबिल्वमंदारकह्लारसरसीरुहैः। सिंदूरंकर्णिकारंचद्रोणपुष्पंच
मल्लिकं।४९। कुशापामार्गतुलसीमाधवीबकजातिका। बृहतीपुष्पवाराणि
यथालब्धानिसाधकः।५०। निवेदयेत्सुगंधानिमाल्यानिविविधानिच। धूपं
कालागरुंसारंदीपंचविविधंशुभं।५१। अथपायसनैवेद्यंसघृतंसोपदंशकं।
मोदकापूपसंयुक्तंशर्करागुडसंयुतं।५२। मधुनाक्तंदधियुतंजलपानसमन्वितं।

तेनैवहविषावह्नौजुहुयान्मंत्रभाविताः।५३। आगमोक्तेनविधिनागुरुवाक्यनि
यंत्रितः। नैवेद्यंशंखवेभूयोदद्यात्तांबूलमुत्तमं।५४। धूपनीराजनंरम्यंबलिदर्प
णमुत्तमं। समर्प्ययित्वाविधिवत्मंत्रैर्वैदिकतांत्रिकैः।५५। यद्यशक्तःस्वयं
निःस्वोयथाविभवमर्चयेत्। नक्यादन्नेनगौरीत्वाःपुष्पमात्रेणतुष्यति।५६।
अथांगभूतान्सकलान्गणेशादीन्प्रपूजयेत्। सर्वेश्वरंततस्तुत्वासाष्टांग
प्रणामेद्बुधः।५७। ततःप्रदक्षिणीकृत्यसपर्षदंउमेश्वरादिकान्। पूजांसमर्प्यविधिव
त्प्रार्थयेद्गिरिजापतिं।५८। जयदेवजयाजेयजयशंकरशाश्वत। जयसर्वसु
राध्यक्षजयसर्वसुरार्चित।५९। जयसर्वगुणातीतजयसर्ववरप्रद। जयनि

ब्रह्मो·
४८ त्पनिराधार जयविश्वंभराव्यय॥६०॥जयविश्वेश्वरावंद्य ईश्वर॥जयनागेंद्रभूष
ण॥जयगौरीपतेशंभो जयचंद्रार्द्धशेखर॥६१॥जयकोट्यर्कसंकाश॥जयानं
तगुणाकर॥जयरुद्रविरूपाक्ष जयानंतनिरंजन॥६२॥जयनाथ कृपासिंधो
जयभक्तार्तिभंजन॥जयदुस्तरसंसारसागरोत्तारणप्रभो॥६३॥प्रसीदमेम
हाभागसंसारार्त्तस्यखिद्यत॥सर्वपापक्षयंकृत्वा रक्षमांपरमेश्वर॥६४॥महा
दारिद्र्यमग्नस्यमहापापहतस्य च॥महाशोकनिमग्नस्य महारोगातुरस्य च॥६५॥ ४८
ऋणभारपरीतस्य दह्यमानस्य कर्मभिः॥ग्रहैः प्रपीड्यमानस्य प्रसीद मम शंक
र॥६६॥दरिद्रः प्रार्थयेद्देवं पूजांते गिरिजापतिं॥ प्रमात्यो वापि रा[illegible]वा

प्रार्थयेद्देवमीश्वरं॥६७॥दीर्घमायुः सदारोग्यं कोशवृद्धिर्बलोन्नतिः॥ममास्तु
नित्यमानंदं प्रसादात्तव शंकर॥६८॥शत्रवः संक्षयं यांतु प्रसीदंतु मम ग्रहाः॥नश्यं
तु दस्यवो राष्ट्रे जनाः संतु निरापदः॥६९॥दुर्भिक्षमारीसंतापाः शमं यांतु महीत
ले॥सर्वसस्यसमृद्धीनां भूयात्सुखमया दिशः॥७०॥एवमाराधयेद्देवं प्रदोषे
गिरिजापतिं॥ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्च पूजयेत्॥७१॥सर्वपाप
क्षयकरी सर्वदारिद्र्यनाशनी॥शिवपूजा मयाख्याता सर्वाभीष्टफलप्रदा॥७२॥महा
पातकसंघातमक्षिकं चोपपातकं॥शिवद्रव्यापहरणं दन्यत्सर्वं विनाशयेत्॥७३॥
ब्रह्महत्यादिदोषाणां पुराणेषु श्रुतिष्वपि॥प्रायश्चित्तानि दृष्टानि निर्विवाद्य महारिणां॥७४॥

प्रदो० ४९ बहुनात्र किमुक्तेन श्लोकार्द्धेन ब्रवीम्यहं। ब्रह्महत्याशतं वापि शिवपूजा विना
शयेत्॥ ७५॥ मयाकथितमेतत्ते प्रदोषे शिवपूजनं। रहस्यं सर्वजंतूनामत्र ना
स्त्येव संशयः॥ ७६॥ एताभ्यामपि बालाभ्यां शिवपूजाविधियतां। अतः सर्वेश्व
रो देवो परां सिद्धिमवाप्स्यथ॥ ७७॥ इति शांडील्यवचनमाकर्ण्य द्विजभामिनी॥
ताभ्यां तु सहबालाभ्यां प्रणनाम मुनेः पदे॥ ७८॥ ॥विप्रस्त्री उवाच॥ ॥अ
हमद्य कृतार्थास्मि तव दर्शनमात्रतः। एतौ कुमारौ भगवन् त्वामेव शरणं ग
तौ॥ ७९॥ एष मे तनयो ब्रह्मन् शुचिव्रत इतीरितः। एष राजसुतो नाम्ना धर्मगुप्तः ४९
कृतो मया॥ ८०॥ एतावहं च भगवन् भवच्चरणकिंकराः। समुद्धरास्मान्पतितान् घो

रे संसारसागरे॥ ८१॥ इति प्रपन्नां शरणं द्विजस्त्रियमाश्वास्य वाक्यै——— प
मानैः॥ उपादिदेशाथ तयोः कुमारयोर्मुनिः शिवाराधनमंत्रविद्यां॥ ८२॥ अ
थोपदिष्टौ मुनिना कुमारौ ब्राह्मणी च सा तं प्रणम्य समामंत्र्य जग्मुस्ते शिव
मंदिरं॥ ८३॥ ततः प्रभृति तौ बालौ मुनिवर्योपदेशतः। प्रदोषे पार्वतीशस्य पू
जां चक्रतुरंजसा॥ ८४॥ एवं पूजयतोर्देवं राजद्विजकुमारयोः। सुखेनैव व्यती
याय तयोर्मासिचचतुष्टयं॥ ८५॥ कदाचिद्राजपुत्रेण विनासौ द्विजनंदनः। स्ना
तुं गतो नदीतीरे चचार बहुलीलया॥ ८६॥ तत्र निर्झरनिर्घातप्रभिन्ने च प्रकुट्टि
मो निधानकलशं स्फुरंतं च ददर्श सः॥ ८७॥ स दृष्ट्वा सहसागत्य हर्षकौतु

अश्लो०
५०

कविकलः।देवोपपन्नंमत्वानोगृहीत्वागिरिसाययौ।८८।ससंभ्रमंसमानीय
निधानकलशंविशालं।निधानमन्वनस्यांतर्मातरंसमभाषत।८९।मातर्मा
तरिदंपश्यप्रसादंगिरिजापतेः।निधानकुंभरूपेणदत्तमेकरुणात्मना।९०
अथसाविस्मितासाध्वीसमाहूयनृपात्मजं।स्वपुत्रंप्रतिनेयाहमानयंतेशि
वार्चनं।९१।शृणुतांमेवचःपुत्रौनिधानकलशंत्विमं।समंविभज्यगृह्ण
तांममत्रासनगौरवात्।९२।इतिमातृवचःश्रुत्वाउवोचद्विजनंदनः।अत्रा
हराजपुत्रस्त्वंविश्रब्धःशंकरार्चने।९३।मातस्तवसुतस्यैवसुकृतेनसमाग ५०
तः।नाहंगृहीतुमिच्छामिविभक्तंधनसंचयं।९४।आत्मनःसुकृतादन्यदास्वाद्य

मेवमुनस्यसौऽयदाकदाचिद्गौरीनाथःकरिष्यतिकृपांमयि।९५।एवमर्चयतो
र्वांसंसुन्वयोपिपरयामुदा।संवत्सरोव्यतीयायतस्मिन्नेवगृहेतयोः।९६।अथै
कदाराजसूनुःसहतेनद्विजन्मना।वसंतसमयेप्राप्तेविजहारवनांतरा।९७।
अथदूरगतौक्वापिवनेद्विजनृपात्मजौ।गंधर्वकन्यकाक्रीडंतीःशतशस्तावप
श्यतां।९८।ताःसर्वाश्चारुसर्वांग्योविहरंत्योमनोहरं।दृष्ट्वाद्विजन्मजोदूरा
दुवाचनृपनंदनं।९९।इतःपुरेनगंतव्यंविहरंत्यत्रताःस्त्रियः।स्त्रीसंनिकर्षं
विबुधस्त्यजंतिविमलाशयाः।१००।एताःकैतवकारिण्योघनयौवनदुर्मदाः।मो
हयंतिजनंदृष्ट्वावरान्मुनयकोविदाः।१०१।अतःपरित्यजेत्स्त्रीणांसंनिधिंसहसा

षणे। निजधर्मरतो विद्वान् ब्रह्मचारी विशेषतः ॥२॥ अतोहं नोत्सहे गंतुं की
डस्थानं मृगीदृशां ॥ इत्युक्तो द्विजपुत्रस्तु निवृत्तो दूरतः स्थितः ॥३॥ अथा
सौ राजपुत्रस्तु कौतुकाविष्टमानसः ॥ तासां विहारपदवीमेकएवान्वयो
ययौ ॥४॥ तत्र गंधर्वकन्यानां मध्ये चैकावरानना ॥ दृष्ट्वा तं राजतनयं चिं
तयामास चेतसा ॥५॥ अहो कोयमुदारांगो युवा सर्वांगसुंदरः ॥ मत्तमातं
गगमनो लावण्यामृतवारिधिः ॥६॥ लीलावलोकविशालाक्षो मधुरस्मित
पेशलः ॥ मदनोयमरूपश्री सुकुमारांगलक्षणः ॥७॥ इत्याश्चर्ययुता बा
ला दूराद्दृष्ट्वा नृपात्मजं ॥ सखीः सर्वाः समालोक्य वचनं चेदमब्रवीत् ॥८॥ इतो

विहरे हे सख्यो वनमस्मिन् कुसुमोत्तमे ॥ विचित्रचंपकाशोकपुन्नागवकुलैर्वृते
॥९॥ तत्र गत्वा वनं सर्वाः संचीय कुसुमोत्करं ॥ नवत्या पुनरायातु तावत्तिष्ठाम्य
हं त्विह ॥१०॥ इत्यादिष्टः सखीवर्गो जगाम विपिनांतरं ॥ सोपि गंधर्वजा तस्मै
न्यस्तदृष्टिर्नृपात्मजे ॥११॥ तां समालोक्य तन्वंगीं नवयौवनशोभिनीं ॥ बालां
स्वरूपसंपत्त्या परिभूततिलोत्तमां ॥१२॥ राजपुत्रः समागम्य कौतुकोत्फुल्ल
लोचनः ॥ अवाप दैवयोगेन मदनस्य निषेव्यतां ॥१३॥ गंधर्वतनया सापि प्राय
भूपसूनवे ॥ उच्छाय प्रददौ तस्मै तरसा पद्मवासनं ॥१४॥ इतो पचारमासीनं त
मास्माद्यसुमध्यमा ॥ पप्रच्छ तद्रूपगुणैर्ध्वस्तधैर्याकुलेंद्रिया ॥१५॥ कस्त्वं कमलपत्रा

ब्रसो॰
५२

दकस्माद्देशाद्दिहागतः। कस्य पुत्रश्च तिप्रेम्णा पृष्टः सर्वं न्यवेदयेत्॥१६॥ वि
दर्भराजतनयं विध्वस्तपितृमातृकं। शत्रुभिर्हृतमास्थानमात्मानं परराष्ट्र
कं॥१७॥ सर्वमावेद्य भूयस्तां पप्रच्छ नृपनंदनः। का त्वं वामोरु किं चात्र कार्यं
ते कस्य चात्मजा॥१८॥ किं निबध्याय सि हृदा किं वा चक्रमिहेच्छसि। इत्युक्ता
सा पुनः प्राह शृणु राजेंद्रसत्तम॥१९॥ अस्त्येको द्रविडो नाम गंधर्वाणां कु
लाग्रणीः। तस्याहमस्मि तनया नाम्ना चांशुमती शुभा॥२०॥ त्वमायांतं वि
लोक्याहं त्वत्संभाषणलालसा। त्यक्त्वा सखीजनं सर्वमेकैवास्मि महाम ५२
ते॥२१॥ सर्वसंगीतविद्यासु नमत्तोऽन्योस्ति किंचन। मम गेयेऽनुरूप्यं तिसर्वात्र

पि सुरस्त्रियः॥२२॥ साहं सर्वकलाभिज्ञा ज्ञाता सर्वजनैर्गिता। तवाहमीप्सि
तं बिभ्रमयि ते संगतं मनः॥२३॥ तथा ममापि नो रुष्टो दैवेन प्रतिपादितौ। आव
योः स्नेहनैरोऽत्र नाभिभूयाद्वितः परं॥२४॥ इति संभाष्य तेनाशु प्रेम्णा गंधर्व
नंदना मुक्ताहारं ददौ तस्मै स्वकुचांतरभूषणं॥२५॥ तमादायाद्भुतं हारं स तस्याः
प्रणयाकुलः। गांढहर्षनिरोभिकर इदमाह नृपात्मजः॥२६॥ सत्यमुक्तं त्वया भी
रु तथाप्येकं वदाम्यहं। त्यक्तराज्यस्य निःस्वस्य कथं वे ऽनवसि प्रिया॥२७॥ सा त्वं
पित्रं मतीबाला विलंघ्य पितृशासनं। स्वछंदाद्वरणं कर्तुमिहैव कथमर्हसि॥२८॥ इ
ति तस्य वचः श्रुत्वा तं प्रत्याह सुविस्मिता। अस्तु नाम तथैवाहं करिष्ये पत्रपके तु कं॥२९॥

गछतावत्तूस्वभवनंपरश्वःप्रातरेवतु।आगछपुनरत्रैवकार्यमस्तिचू
नोमृषा।३०।इत्युक्त्वातंनृपसुतंसासंगतसखीजना।अपक्रामंतिचार्वं
गीसचापिनृपनंदनः॥३१॥ससमभ्येत्यहर्षेणद्विजपुत्रस्यसन्निधिं।सर्वमा
ख्यायतेनैवसार्धंस्वभवनंययौ।३२।तांचविप्रसतीभूपोहर्षयित्वानृपा
त्मजः।गंधर्वराजमद्राक्षीस्वदुहित्रासमन्वितं।परश्वोद्विजपुत्रेणसार्धं
तेनवनंययौ।३३।सतयापूर्वनिर्दिष्टंस्थानंप्राप्यनृपात्मजः।गंधर्वराजम
द्राक्षीत्स्वदुहित्रासमन्वितं।३४।सगंधर्वपतिःप्राप्तावपिनंद्यकुमारकौ।
उपविश्यासनेरम्येराजपुत्रमभाषत।३५।गंधर्वउ॥ ॥राजेंद्रपुत्रपूर्वेद्युःकैला ५३

संगतवानहं।तत्रापश्यन्महादेवंपार्वत्यासहितंविभुं।३६।आहूयमांसदेवे
शःसर्वेषांचदिवौकसां।सन्निधावाहभगवान्करुणामृतवारिधिः।३७।धर्म
गुप्ताह्वयःकश्चिद्राजपुत्रोस्तिभूतले।अकिंचनोनष्टराज्योहतबंधुश्चमातृ
मान्।३८।सबालोगुरुवाक्येनमदर्चायांरतःसदा।अद्यतत्पितरःसर्वेमांप्राप्ता
मत्प्रभावतः।३९।तस्यचत्वमपिसाहाय्यंकुरुगंधर्वसत्तम।ययासौनिजराज्य
स्थोहतशत्रुर्भविष्यति।४०।वरस्मात्सोमहेशेनसंप्राप्यनिजमंदिरं।अनयामेदु
हित्राचबहुशोभ्यर्थितःसदा।४१।ज्ञात्वेदंसकलंशंभोर्नियोगंकरुणात्मनः।
आ।हायेमांदुहितरंप्राप्तोस्मीदंवनांतरं।४२।अस्यैनांचप्रयच्छामिकन्यामंशुमतीसुता

डाक्टर भाऊदाजी स्मारक
MEMORIAL
Dr. BHAU DAJI
MEMORIAL

हत्वा शत्रून्स्वराज्ये त्वां स्थापयामि शिवाज्ञया ॥४३॥ तस्मिन्पुरे त्वमनया भु
क्तभोगा नृपश्रेष्ठ सितान् । दशवर्षसहस्रांते गंतासि गिरिजालयं ॥४४॥ तत्रा
पि मम कन्येयं त्वामेव प्रतिपत्स्यति । अनेनैव स्वदेहेन दिव्येन शिवसन्निधौ ॥
४५॥ इति गंधर्वराजस्तमाम्नाप्य प्रनंदनं । तस्मिंश्चने स्वदुहितुः पाणिग्राहम
कारयत् ॥४६॥ पारिबर्हमदात्तस्मै रत्नभारान्महोज्ज्वलान् । चूडामणिं चेंद्रनि
भं मुक्ताहारांश्च भासुरान् ॥४७॥ दिव्यालंकारवासांसि कार्त्तस्वरपरिच्छदान् ।
गजानामयुतं भूयो नियुतं नीलवाजिनां ॥४८॥ स्पंदनानां सहस्राणि सौवर्णानि
महांति च । पुनरेकं रथं दिव्यं धनुश्चेंद्रायुधोपमं ॥४९॥ शास्त्राणां च सहस्राणि

तूणी चाक्षय्यसायकौ । अभेद्यं चमसौवर्णं शक्तिं च रिपुमर्दिनीं ॥५०॥ दुहितुः
परिचर्यार्थं कन्यानां तु सहस्रकं । ततोदात्तमनास्तस्मै धनानि विविधानि
च ॥५१॥ गंधर्वसैन्यमत्युग्रं चतुरंगसमन्वितं । पुनश्च तत्सहायार्थं गंधर्वाधि
पतिर्ददौ ॥५२॥ इत्थं राजेंद्रतनयः संप्राप्य श्रियमुत्तमां । अंशुमीष्टजायायाः स
हितो मुमुदे लब्धसंपदः ॥५३॥ कारयित्वाथ दुहितुर्विवाहं समयोचितं । ययौ
विमानमारुह्य गंधर्वाधिपतिर्दिवं ॥५४॥ धर्मगुप्तः कृतोद्वाहः सह गंधर्वसेन
या । पुनः स्वनगरीं प्राप्य जघान रिपुवाहिनीं ॥५५॥ उरूर्षेण रणे हत्वा शत्रूंस्ता
गंधर्वसेनया । निःशेषितारातिबलः प्रविवेश निजं पुरं ॥५६॥ ततो जिनंद्यस

ब्रह्मो॰
५५

स्त्रीकः आसन्नैश्वर्यमहत्तमैः ॥ रत्नसिंहासनारूढश्चक्रे राज्यमकंटकं ॥५७॥
यो विप्रवनिता पूर्वं तमपुष्णा स्वपुत्रवत् ॥ सैव माता तु तस्य स भ्राता
द्विजनंदनः ॥५८॥ गंधर्वतनयां जायां विदर्भविषये ततः ॥ आराध्य दैवतं त्र्यं
बुं धर्मगुप्तो नृपोऽभवत् ॥५९॥ एवमन्येऽपि समाराध्य प्रदोषे गिरिजापतिं ॥ ल
भंते नीप्सितान् कामान् देहांते परमां गतिं ॥६०॥ ॥सूतउ॰॥ ॥एतन्मा
हात्म्यं नः पुण्यं प्रदोषेऽर्ककरार्चनं ॥ धर्मार्थकाममोक्षाणामेतत्साधनकं परं ॥
॥६१॥ य एतच्छृणुयान्नित्यमारव्यानं परमाद्भुतं ॥ प्रदोषे शिवपूजांते कथयेद्वा ५५
समाहितः ॥६२॥ न तस्य दारिद्र्यं जन्मांतरशतेष्वपि ॥ ज्ञानैश्वर्यसमायुक्तः

सोंते शिवपदं व्रजेत् ॥६३॥ यः प्राप्य दुर्लभमिदं मनुजाः शरीरं कुर्वंति न प
रमेश्वरपादपूजां ॥ धन्यास्त एव निजपुण्यजितत्रिलोकास्तेषां पदांबुजरजो
भुवनं पुनाति ॥६४॥ ॥इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे सप्तमोऽध्यायः ॥ ॥
सूतउ॰ ॥ ॥निरानंदमयं शांतं निर्विकल्पं निरामयं ॥ शिवतत्वमनाद्यंतं
ये विदुस्ते परं गताः ॥१॥ विरक्ताः कामभोगेभ्यो ये च कुर्वंति हैतुकीं ॥ भक्तिं परां
शिवे धीरास्तेषां मुक्तिर्न संसृतिः ॥२॥ विषयानभिसंधाय ये कुर्वंति शिवे रतिं ॥
विषयैर्नाभिभूयंते भुंजानास्ते फलान्यपि ॥३॥ येन केनापि भावेन शिवभक्ति
युतो नरः ॥ न विनश्यति कुत्रापि भावेनापि परां गतिं ॥४॥ आरुरुक्षुः परं स्थानं विष

ब्रह्मो०
५६

यस्मात्कुमत्तमः।पूजयेत्कर्मणाशंभुंभोगांस्तेसुखमाप्नुयात्।५।अशक्ताःक
श्चिदस्पृष्टप्रायोविषयवासनां।अतःकर्ममयीपूजाकामधेनुःशरीरिणां।
६।मायामयेपिसंसारेयेविरूप्यचिरंसुखं।मुक्तिमिच्छंतिदेहांतेतेषांधर्मो
यमीरितः।७।शिवभक्तिस्तथाकार्याहेतुःस्वर्गापवर्गयोः।सोमवारेविशेषेण
प्रदोषादिगुणैर्युते।८।केवलेनापियेकुर्युःसोमवारेशिवार्चनं।नतेषांविद्य
तेकिंचिदिहामुत्रचदुर्लभं।९।उपोषितःशुचिर्भूत्वासोमवारेजितेंद्रियः।वै
दिकैर्लौकिकैर्वापिविधिवत्पूजयेच्छिवं।१०।ब्रह्मचारीगृहस्थोवाकन्यावापि ५६
सभर्तृका।विभर्तृकावासंपूज्यलभतेवरमीप्सितं।११।अत्राहंकथयिष्यामि

कथांश्रोत्रमनोरमांयच्छ्रुत्वालब्धधियःशंभोर्भक्तिंकुर्वंतिनिश्चलां।१२।
आर्यावर्तेनृपःकश्चिदासीत्परमधार्मिकः।चित्रवर्मेतिविख्यातोधर्मी
राजामहात्मनः।१३।सगोप्ताधर्मसेतूनांशास्तादुष्टापगामिनां।यष्टासं
कलयज्ञानांत्राताशरणमिच्छतां।१४।कर्तासिकलपुण्यानांदातासकलसं
पदां।जेतासपत्नवृंदानांभक्तःशिवमुकुंदयोः।१५।सोनुकूलःसपत्नीषुल
ब्धपुत्रान्महौजसः।चिरेणप्रार्थितांलेभेकन्यामेकांमनोरमां।१६।सलब्ध्वा
तनयांदिष्ट्याहिमवानिवपार्वतीं।आत्मानंदेवसदृशंमेनेपूर्णमनोरथं।१७।
सएकदाराजातकलक्षणज्ञानाहूयसर्वान्द्विजवृंदमुख्यान्।कुतूहलेन।

म्निनिविष्टचेताः पप्रच्छ तस्माजनः नेनविष्णं।१८। अथतत्राब्रवीदेकोवृद्धो
द्विजसत्तमः। एषासीमंतिनीनाम्नाकन्यातवमहीपते।१९। उमेवमंग
लवतीदमयंतीवरूपिणी। भारतीवकलाभिज्ञालक्ष्मीरिवमहागुणा।२०।
सुप्रजादेवमातेवजानकीवधृतव्रता। रविप्रभेवसंक्रांतिश्चंद्रिकेवमनो
रमा।२१। दशवर्षसहस्राणिसहभर्त्राप्रमोदते। प्रसूततनयानष्टोपरंसु
खमवाप्स्यसि।२२। इत्युक्त्वैवंतंनृपतिर्धनैःसंपूज्यतंद्विजं। अवापपरमां
प्रीतिंतद्वागमृतसेवया।२३। अथान्योपिद्विजःप्राहधैर्यवानविशंकितः। ५७
एषाचतुर्दशेवर्षेवैधव्यंप्रतिपत्स्यति।२४। इत्याकर्ण्यवचस्तस्यवज्रनिर्घात

निष्ठुरं। मुहूर्त्तमिवराजाभूच्चिंतयाकुलमानसः।२५। अथसर्वान्समुत्सृज्य
ब्राह्मणान्ब्रह्मवत्सलः। सर्वंदैववशंमेनेव्यथितःपार्थिवोभवत्।२६। सा
पिसीमंतिनीबालाक्रमेणगतशैशवा। वैधव्यमात्मनोभाविशुश्रावचस
खीमुखात्।२७। परंनिर्वेदमापन्नातदाकर्ण्यसुविस्मिता। याज्ञवल्क्यमुनेःप
त्नीमैत्रेयींपर्यपृच्छत।२८। मातस्त्वच्चरणांभोजेप्रपन्नास्मिभयाकुला। सौभाग्य
वर्द्धनंकर्ममभत्वंशंसितुमर्हसि।२९। इतिप्रपन्नांनृपतेःकन्यांचाहमुनेःसती।
शरणंव्रजचंद्रांगिपार्वतींशिवसंयुतां।३०। सोमवारेशिवंगौरींपूजयस्वसमाहि
ता।उपोषितावासुस्नाताविरजांबरधारिणी।३१। यतवाग्निश्चलभवतिःपूजां

कृत्वायथोचितां।ब्राह्मणान्भोजयित्वाचशिवंसम्यक्प्रसादया।३२।
पापघ्नयोभिषेकेणसाम्राज्यंपीठपूजनात्।सौभाग्यमखिलंसौख्यं
गंधमाल्याक्षतार्चनात्।३३।धूपदानेनसौगंध्यंकांतिर्दीपप्रदानतः
।३४।धर्मार्थकाममोक्षाणांनमस्कारप्रसाधनं।अष्टैश्वर्यादिसिद्धीनां
जपएवहिसाधनं।३५।होमेनसर्वकामानांसमृद्धिरुपजायते।सर्वेषा
मपिदेवानांतुष्टिर्ब्राह्मणभोजनात्।३६।एवमाराधयन्शिवंसोमवारे
शिवामपि।इत्यापदमपिप्राप्तांविपद्भिर्नविहन्यते।३७।घोराघोरप्र
पन्नापिमहाक्लेशंभयानकं।शिवपूजाप्रभावेनतरिष्यतिमहद्भयं।३८।

एवंसीमंतिनीसम्यग्याज्ञवल्क्यमुनेःसती।ययौसापिवरारोहाराजपु
त्रीतथाकरोत्।३९।दमयंत्यानलस्यासीदिंद्रसेनाह्वयःसुतः।तस्य
चंद्रांगदोनामपुत्रोभूदिंद्रसंनिभः।४०।चित्रवर्मैवनृपश्रेष्ठस्तमाहूयनृ
पात्मजं।कन्यांसीमंतिनींतस्मैप्रायच्छद्गुर्वनुज्ञया।४१।सोभून्महोत्स
वस्तत्रतस्याउद्वाहपर्वणि।तत्रसर्वमहीशानांसमवायोमहानभूत्।४२।
तस्याःपाणिग्रहंकालेकृत्वाचंद्रांगदःकृतीनदासकतिचिन्मासान्तत्रै
वश्वशुरालये।४३।एकदायमुनांतर्तुंसराजतनयोबली।आरोहततरीं
केश्चिद्वयस्यैःसहलीलया।४४।तस्मिंस्तरतिकालिंदींराजपुत्रोविधेर्वशात्।

ममज्जुस्सह कैवर्त्तैरावर्त्तैर्निहितालये ॥४५॥ हाहेति शब्दः सुमहानासीत्त
स्मात्तटद्वये ॥ पश्यतां सर्वसैन्यानां प्रजोपो दिवमस्पृशत् ॥४६॥ ममज्जुर्लो
मञ्जिरे केचित्केचित्ग्राहोदरं गताः ॥ राजपुत्रादयः केचिन्नद्यां पेते महा
जले ॥४७॥ तदुपस्पृश्य राजापि चित्रवर्माति विक्लवः ॥ यमुनायास्तटं प्रा
प्य विचेष्टं न्यसमपद्यत ॥४८॥ श्रुत्वा च राजपत्नी स बन्धुवर्गश्च चेतनाः ॥ सा
च सीमंतिनी श्रुत्वा पपात भुवि मूर्छिता ॥४९॥ तथान्ये मंत्रिमुख्याश्च ना
यकाः सपुरोहिताः ॥ विक्लवा लोकसंतप्ता बभूवुर्मुक्तमूर्द्धजाः ॥५०॥ चंद्र
सेनोपि राजेंद्रः पुत्रवार्त्तां सुदुःसहां ॥ आकर्ण्य सह पत्नीभिर्नष्टसंज्ञः पपात ह ॥५१॥

तन्मंत्रिणश्च तस्यौरास्तथा देशनिवासिनः ॥ आबालवृद्धवनिताश्चुक्रु
शुः शोकविक्लवाः ॥५२॥ शोकात्केचिदुरो जघ्नुः शिरो जघ्नुश्च केशवाह
राजपुत्रहस्तात्खड्गासिक्तासीलिबन्त्रमुः ॥५३॥ एवं शोकाकुले दीनेंद्रसे
नमहीपतेः ॥ नागरौ सहसा क्षुब्धं चित्रवर्मपुरं तथा ॥५४॥ अथ वृद्धैः समा
श्वस्तश्चित्रवर्मा महीपतिः ॥ शनैर्नगरमागत्य सांत्वयामास चात्मजां ॥५५॥
स राजा न्यसिमग्नस्य जामातुस्तस्य बांधवैः ॥ आगतैः कारयामास साक
न्यौर्ध्वदैहिकं ॥५६॥ सा च सीमंतिनी साध्वी भर्तुर्लोकिंमयेप्सती ॥ पित्रा नि
षिद्धा स्नेहेन वैधव्यं प्रत्यपद्यत ॥५७॥ मुनिपत्न्योपदिष्टं यत्सोमवारव्रतं शुभं ॥

नतत्याजश्रुत्वाचारांवैधव्यंप्राप्तवत्यपि ॥५८॥ एवंचनृत्तहृष्टैवर्षेर्दुःखंशो
प्यसुदारुणं ॥ ध्यायंतीनित्रिवपादाब्जंवक्रस्तत्रयमत्यगात् ॥५९॥ पुत्रशोका
द्दिवान्मत्तमिंद्रसेनंमहीपतिं ॥ असद्यतसहायायादासस्मांगंजकुरोजसा
॥६०॥ रुलसिंहासनपरेहयिन्दैः सोप्यनोनृपः ॥ निगड्यकारोनवनेस
पत्नीकोनिवेशितः ॥६१॥ चंद्रांगदोपितत्सुत्रानिमग्नोयमुनाजले ॥ अ
धोधोवतस्त्रेकांदृदर्शोरगकामिनीं ॥६२॥ जलक्रीडानुरक्तास्ता दृष्ट्वाराज
सुकारकं ॥ विस्मितास्तमधोनिन्युः पातालंपन्नगालयं ॥६३॥ स नीयमानः
सहसापन्नगीभिर्नृपात्मजः ॥ तक्षकस्यपुरंरम्यंविवेशापरमाद्भुतं ॥६४॥

सोपन्नपश्यजतमयोमहेंद्रभवनोपमं ॥ महारत्नपरिस्त्राजन्मयूषपरिदी
पितं ॥६५॥ वज्रविद्रुमवैडूर्यप्रासादशतसंकुलं ॥ माणिक्यगोपुरोद्दालं
मुक्तादामभिरुज्ज्वलं ॥६६॥ चंद्रकांतस्थलीरम्यंहेमस्फारकपाटकं ॥ अनेक
शतसाहस्रमणिदीपविराजितं ॥६७॥ तत्रापश्यन्नामध्येनिषसंरत्नवि
ष्टरे ॥ तक्षकंपन्नगाधीशंफणानेकशतोज्ज्वलं ॥६८॥ दिव्यांबरधरंदीप्तंर
त्नकुंडलमंडितं ॥ नानारत्नपरिक्षिप्तमुकुटद्युतिरंजितं ॥६९॥ फणामणि
मयूखाद्यैरसंख्येः पन्नगोत्तमैः ॥ उपासितंप्रांजलिभिश्चित्रालंकारभूषणैः ॥
॥७०॥ रूपयौवनगांभीर्यविलासगतिशोभिनानानागकन्यासहस्रेणसमंतात्

रिवारितं ।७१। दिव्याभरणदीप्तांगं दिव्यचंदनचर्चितं । कालाग्निमि
वउद्वषं तेजसा दीप्तसंनिभं ।७२। दृष्ट्वा राजसुतो धीरः प्रणिपत्यसमन्ना
तले उत्थितः प्रांजलिस्तस्थौ तेजसाक्षिप्तलोचनः ।७३। नागराजोपितं
दृष्ट्वा राजपुत्रं मनोरमं । कोयं कस्मादिहायात इति पप्रच्छ पन्नगीः ।७४। ता
ऊचुर्यमुनातोये दृष्टोस्माभिर्यदृच्छया । अज्ञात्वतकुलनामायमानी
तस्तव सन्निधिं ।७५। अथ पृष्टो राजपुत्रस्तक्षकेण महात्मना । कस्यासि
तनयः कस्त्वं को देशः कथयस्व मे ।७६। राजपुत्रउ० ॥ अस्ति भूमंडले क
श्चिद्देशो निषधसंज्ञितः । तस्याधिपो भवद्राजा नलो नाम महायशाः ।७७।

स पुण्यकीर्त्तिः क्षितिपो दमयंतीपतिः प्रभुः । तस्यासीदिंद्रसेनाख्यः पुत्र
स्तस्य महात्मनः ।७८। चित्रांगदोस्मि नामाहं नवोढः स्वसुरालये । विहरन्य
मुनातोये निमग्नो दैवनोदितः ।७९। एताभिः पन्नगस्त्रीभिरानीतोस्मि तवांति
कं । दृष्टवांस्तव पादाब्जं पुण्यैर्जन्मांतरार्जितैः ।८०। अद्य धन्योस्मि धन्योस्मि कृ
तार्थौ पितरौ मम । यत्त्वयैक्षितोहं कारुण्यात्त्वया संभाषितोपि च ।८१। श्रीसू
तउ० ॥ इत्युदारमसंभ्रांतं वचस्तस्यापि पेशलं । तक्षकः पुनरो मुक्तोबा
भाषे राजनंदनं ।८२। तक्षक उ० ॥ भोभो राजेंद्रदायाद मा भैषीर्धीरतां व्र
जः सर्वदेवेषु को देवो युष्माभिः पूज्यते ।८३। राजपुत्रउ० ॥ यो देवः सर्वभूतेषु

महादेवइतिस्मृतः पूज्यते सह विश्वात्मा शिवोस्माभिरुमापतिः।८४।य
स्य तेजोंशलेशेन रजसा च प्रजापतिः। कृतरूपोसृजद्विश्वं सनः पूज्यो महे
श्वरः।८५। यस्यांशांसात्त्विकं दिव्यं बिभ्रद्विष्णुः सनातनः। विश्वं बिभर्ति वि
श्वात्मा सशिवोस्माभिरीज्यते।८६। यस्यांशेन तामसा कालो रुद्रः काला
ग्निसम्मितः। विश्वमत्ति हरत्ते संपूज्योस्माभिरीश्वरः।८७। यो विधाता
विधातानुग्रहकारणस्यापि कारणं। तेजसां परमं तेजः सशिवः सपरा गतिः।
।८८। योग्नौ वियति यो भूमौ यो वायौ यो सलिले च यः। यश्चाकाशे च विश्वा
त्मा स पूज्यो नः सदाशिवः।८९। यः साक्षी सर्वभावानां यश्चात्मस्थो निरंजनः।

यस्मैगावल्गागोल्लोकः सोस्माभिः पूज्यते शिवः।९०। यमेकमाद्यं पुरुषं पु
राणं वदंति भिन्नं गुणवैरूतैरपीहैतत्र समन्येन तुरीयमेकेकूटस्थसत्ये न
सशिवो गतिर्नः।९१। यन्नस्पृशंत्येनमचिंत्यतत्वं दुरंतक्ष्मामानमसत्स्वरूपं।
मनोवचो दृष्ट्यश्चात्मज्ञानांस एव पूज्यः परमः शिवो नः।९२। अयस्यप्रसादं प्रति
लभ्य सर्वां भोवांछंति ऐंद्रं पदमब्जजं वा। निस्तीर्णकर्माणि वकालचक्रास्तर
त्यभीताः सशिवो गतिर्नः।९३। यस्य स्मृतं सकलपापरुजां विघातं सघः
करोत्यपि च पुल्कसजन्मभाजां। यस्य स्वरूपमखिलं श्रुतिभिर्विमृग्यं त
स्मै शिवाय सततं करवाम पूजां।९४। यन्मूर्ध्नि लब्धनिलयासुरलोकसिंधुर्य

ब्रह्मो०
६३

स्यांकगाम्नगावतीजगदंबिकावा।यत्कुंडलेचहहवासुकितक्षकौद्वौसोस्मा
कमेकगतिरर्द्धशशांकमौलिः।९५।जयतिनिगमचूडापुष्पमस्यांघ्रिप
द्मंजयतिसततनित्यंयोगिनीयस्यकीर्त्तिः।जयतिसकलतत्त्वोद्भासनंय
स्यमूर्त्तिःसुविजितगुणसर्गःपूज्यतेस्मान्निरीशः।९६।। ।।सूतउ०।। ।।
रत्नाकरएवंवचस्तस्यतच्छ्रुत्वाप्रीतमानसः।जातभक्तिर्महादेवेराजपुत्रमभा
षत।९७।।तक्षकउ०।। ।।परितुष्टोस्मिभद्रंतेतवराजेंद्रनंदनः।बालो
पिइवरंलब्धंवेस्मिन्नोवंपपासरं।९८।एषरत्नमयोलोकःप्रीतास्त्वास
दृशावलाः।एतेकल्पद्रुमाःसर्वेनद्योमृतरसांतसाः।९९।नात्रमृत्युर्नवा

डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL
८

घोरंनजरारोगपीडनं।यथेष्टंविहरात्रैवभुंक्ष्वभोगानयथोसितान्।
१००।इत्युक्तस्तक्षकेणासौचंद्रसेनकुमारकः।अत्कवाचपरंप्रीतास्तलांज
लिसरुदारधीः।।१।कृतदारोस्म्यहंकालेसुव्रतागृहणीमम।त्रिबम्मारसा
नित्यंपितरावेकपुत्रकौ।।२।तत्त्वद्यमोमृतमनात्रगोकेनमहताहृताः।प्रायः
प्राणैर्वियुज्यंतदेवास्त्राणार्चर्हतिच।।३।अहोमयाबहुतिथिंनात्रस्थेयंक
यंचन।तमेवलोकंरूपयामांप्रापयितुमर्हसि।४।इत्युक्तःपुनर्नरदेवपुत्रे
दिव्यैवरान्नैःसुरयादृथोवैः।आप्यायायित्वावरगंधवासःस्रग्रत्नदिव्या
भरणैर्विचित्रैः।५।संतोषयित्वाविविधैःसुभोगैःपुनर्बभाषेभुजगाधिराजः

डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL

यदा यदा मां स्मरसि त्वं दृश्येत तदा तदा विक्रियते मयेति ॥ ६ ॥ पुनश्च राजपु
त्राय तत्कोश्चं च कामगं ॥ नानाद्वीपसमुद्रेषु नानालोकेषु चानिगर्हितं ॥ ७ ॥ दत्त्वा
वानूरत्नभाराणां दिव्याभरणवाससां ॥ सहायार्थं ददौ चैकं राक्षसं पन्न
गेश्वरं ॥ ८ ॥ तत्सहायार्थमेकं च पन्नगेंद्रकुमारकं ॥ न्ययुंक्त स तक्षकः धीमा
गच्छेति च विसर्ज्याह ॥ ९ ॥ इति चंद्रांगदः सर्वसंगृह्य विविधं धनं ॥ अश्वकाम
गमारुह्य तां स्मां सह विनिर्ययौ ॥ १० ॥ सुमुहूर्त्तादिवोन्मज्य तस्माद्देवसरिज्ज
लात् ॥ विजहार तटे रम्ये दिव्यमारुह्य वाजिनं ॥ ११ ॥ अथास्मिन्समये तत्र वासा
वसीमंतिनी सती ॥ स्नातुं समाययौ तत्र सखीभिः परिवारिता ॥ १२ ॥ सा ददर्श ६४

नदीतीरे विहरंतं नृपात्मजं ॥ रक्षसानन्यरूपेण नागपुत्रेण चान्वितं ॥ १३ ॥ द्वा
श्यतल्पे समासीनं दिव्यमाल्यावतंसिनं ॥ देहेन दिव्यगंधेन वासितदशयोजनं ॥
॥ १४ ॥ नवह्नाम्रिलिबीहृसदिव्याश्वमपि संश्रितं ॥ अत्रोन्मत्तेव नीतेव तरस्त्रोसंभ्र
स्तलोचना ॥ १५ ॥ तां च राजेंद्रपुत्रो सौ दृष्टपूर्वामिवास्मरत् ॥ निर्मुक्तकर्णाभर
णां कंचसूत्रविवर्जितां ॥ १६ ॥ असंयोजितधम्मिल्लां भंगनागरसौकितां ॥ सक
नीलांजनापांगस्त्रिंगांगीं शोकदुःखितां ॥ १७ ॥ तां दृष्ट्वास्यघतुरगाउपविष्टः स
स्तिटोनामारुल्य वरारोहामुपविश्येदमब्रवीत् ॥ १८ ॥ कासि त्वं कस्य कलत्रं वा क
स्यासि तनया सती ॥ किमिदं अंगनाबाल्ये दुःसहं शोककारणं ॥ १९ ॥ रति

स्नेहेनसंदृष्टासावधूरश्रुलोचना।लज्जितासर्वमाख्यातुंतत्सखीसर्वमित्र
वीत्॥२०॥इयंसीमंतिनीनाम्नास्नुषानिषधभूपतेः।चंद्रांगदस्यमहिषीत
नयाचित्रवर्मणः॥२१॥अस्यापतिर्दैवयोगान्निमग्नोयमुनाजलेोतेने
यंप्राप्तवैधव्याबालादुःखेनशोषिता॥२२॥एवंवर्षत्रयंनीतात्रशोकेनाति
कर्शीयसा।अद्येंदुवासरेप्राप्तेस्नातुमत्रसमागता॥२३॥श्वसुरोस्याःसरा
जेंद्रस्तत्राज्यप्रमाथिभिः।बलादाकृष्टीतोबद्धस्वभार्यस्तद्वदास्थितः॥२४॥त
थाप्येषास्नुषात्वाचारासोमवारेमहेश्वरं।सांबिकंपरयाभक्त्यापूजयतेविमल
शया॥२५॥ ॥सूतउ०॥ ॥इत्थंसखीमुखेनैवसर्वमावेद्यसुव्रता।ततःसीमं

मंतिनीप्राहस्वयमेवनृपात्मजं॥२६॥कस्त्वंकंदर्पसंकाशःकाविभोलवमा
गिनौ।देवोनरोवासिद्धोवागंधर्वोवाथकिन्नरः॥२७॥किमर्थंममवृत्तांतंस्ने
हवानिवपृच्छसि।किंमांवेत्सिमहाभागबाहोदृष्टवान्किमुकुत्राचित्॥२८॥
दृष्टपूर्वइवाभासिमयाचस्वजनेयथा।सर्वंकथयतत्त्वेनसत्यसाराहिसा
धवः॥२९॥ ॥सूतउ॥ ॥एतावदुक्त्वामरदेवपुत्रीसबाष्पकंठीसुचिरंरुरो
दासुमोहन्नमौसहसासखीभिर्धृतानकिंचित्कलुरवंशशांकः॥३०॥श्रुत्वा
चित्रांगदःसर्वंप्रियायाःशोककारणं।सुश्रुत्वमिनुवक्त्रात्स्वीस्वयंशोकसमाकु
लः॥३१॥अथास्यास्पप्रियांतत्त्वीविविधैर्वाक्यनैपुणैः।सिद्धोनामवयंदेवकां

मगः सोऽब्रवीदिति ॥३२॥ ततो बलाद्दिवाकृष्य पाणिग्रहणशंकिता । पुलकां-
कितसर्वांगी तां कर्णे चेदमब्रवीत् ॥३३॥ कापि लोके मया दृष्टस्तव भर्त्ता विरा-
नने । च व्रताचरणात्प्रीतः सद्य एवागमिष्यति ॥३४॥ अपाकरोति ते शोकं
द्वित्रैरेव दिनैर्ध्रुवं । एतच्छंसितुमायातस्तव भर्त्तुः सखास्म्यहं ॥३५॥ अत्र
कार्यो न संदेहो न मामिह शिवपादयोः । तावच्च हृदयः श्लेयं न चकारूपं कु-
तश्चन ॥३६॥ स्खलितद्वचनं श्रुत्वा सुधाधाराधिकं । संभ्रमाक्रांतनय-
नालमेव समुद्धृत ॥३७॥ प्रेमबंधानुगुणितं वाक्यं चाटुरसायनं । विभ्रमो-
हाससहितं मधुरापांगवीक्षणं ॥३८॥ स्वपाणिस्पर्शनोद्भिन्नपुलकांचित-

विग्रहं । पूर्वदृष्टान्यथांगेषु लक्षणादिस्वरादिषु ॥३९॥ वचः प्रमाणं वर्णं च प्र-
तीक्ष्य सा समलक्षयत् । एष एव पतिर्मेऽस्मात्सुवने नान्यो भविष्यति ॥४०॥ अस्मि-
न्नेव प्रविष्टे मे हृदयं प्रेमकातरं । परलोकादिहायातः कथमेषः स्वरूपधृक् ॥४१॥
गा न्नीयाः कथं मे स्यात्तु तद्दुर्निष्टस्य दर्शनं । स सोयं किमु न स्वप्नो भ्रमोयं किमु न भ्रमा-
धरा । एष धूर्त्तोथवा वा कश्चिद्यक्षो गंधर्व एव वा । मुनिपत्न्याय दुःखं मे परमापद्गता-
पि च ॥४३॥ व्रतमेतद्गुरुर्ज्योतिस्तस्य वाजा न मद्यमे । नस्याज्ञत्वामिदं भाग्यायाममेता-
ह द्विजोत्तम ॥४४॥ नूनं तस्य वचः सत्यं कोविद्यादीश्वरेहितं । निमित्तानि च दृश्यंते मंगा-
लानि दिनेऽस्मिन्नपि । प्रसन्ने पार्वतीनाथे किमसाध्यं शरीरिणां ॥४५॥ इत्थं विमृश्य बहुधा तां

ब्रह्मो०
६७

पुनर्मुक्तिसंशयः।४६।लज्जानम्रमुखीकर्णेशाब्रूमान्यस्त्रयोजनं।इतिवृत्तांत
माख्यातुंमासित्रोःशोकतप्तयोः।४७।गच्छाभिचरितोभर्त्तर्देशाद्यःपतिमवाप्स्यसि
इत्युक्त्वाश्वंसमारुह्यजवेनन्दपनंदनः।४८।तास्यांसहनिजंराज्यंप्रसपद्यत
ततस्तत्क्षणात्तस्यपुरोपवनाभ्यासेस्थितंचातंफणिपुत्रकं।४९।विस्मसकृन्मिदा
याम्हाक्नृपासनगतान्नृपतिः।सगत्वोवाचतान्नूत्रीघ्रमिंद्रसेनोविमुच्यतां।५०।त्वं
जांगदस्तस्यसुतःआसीयंपन्नगालयात्।नृपासनंविमुंचंत्तुभवंतोमाविचार्यतां
।५१।नचेत्त्वंजांगदस्याशुबाणैःप्राणंनृहरंत्तुवः।समभीयसुनातोयेगत्वातक्ष
कमंदिरं।५२।लब्ध्वाचतस्यसाहाय्यंपुनर्लोकिमिमंगतः।इत्साख्यानंविशेषेण ६७

कृत्वातंनिशामयतां।५३।साधुसाध्वितिसंभ्रांताःशत्रवसुःपरिपंथिनः।सर्वे
इंद्रसेनायनिवेद्यसर्वंनष्टस्यपुत्रस्यपुनःसमागमं।प्रसाद्यतंआक्षनरेश्वरा
सनंदायादमुख्याश्चालयंप्रपेदिरे।५४।आत्मपूर्वजनाःसर्वेपुरोधानेन्दपा
त्मजं।दृष्ट्वाराजाद्भुतंचोचुर्जेग्निरेचमहाधनं।५५।आकर्णपुत्रमायांतंराजा
नंदजलाक्तःनव्यजानादिमंलोकंराज्ञीचपरयामुदा।५६।अथनागरि
काःसर्वेमंत्रिवृद्धाःपुरोधसा।प्रत्युद्गम्यपरिव्रज्यतमौनिन्युर्नृपांतिकं।५७।
अथ्योक्तवेनमहताप्रविष्टोनिजमंदिरं।राजपुत्रःपरिष्वज्यववंदेवाष्पमुक्त
जन्ना।५८।तंपादमूलेपतितंस्वपुत्रंविवेदनासोपृथिवीपतिःक्षणं।प्रबोधितो

मासजनैः कथंचित्तमुत्थाप्य संक्षिप्रस्वरूपाद्यालिलिंगे॥६१॥ क्रमेणमात्रनुमि
बाद्यताभिः प्रवर्द्धिलास्त्रीः प्रणयाकुलाभिः॥ आलिंगितः पौरजनानन्दपोष
न्संभावयामास स राजसूनुः॥६२॥ तेषां मध्ये समासीनस्तद्वृत्तान्तमशेषतः
पित्रे निवेदयामास तक्षकस्य च मित्रतां॥६३॥ दत्तं भुजंगराजेन रत्नादिधन
संचयं। दिव्यं लब्धं समानीतं पित्रे सर्वं न्यवेदयत्॥६४॥ राजा स्वपुत्राचरितं
दृष्ट्वा स्मृत्वाति विस्मितः॥ मेने स्नुषायाः सौभाग्यं महेशाराधनार्जितं॥६५॥ सोमं
गल्यमयीं वाचमिमां निषधभूपतिः॥ चारैर्निवेदयामास चित्रवर्ममहीभुजे॥६६॥
श्रुत्वेमां नृपतिर्वार्त्तां समुत्थाय स संभ्रमात्॥ तेभ्यो दत्वा धनं भूरि निर्भरानंद
विह्वलः॥६७॥ अथाहूय स्वतनयां परिष्वज्याश्रुलोचनः॥

भूषणैर्भूषयामास चित्रवर्ममहीभुजे॥६८॥ सद्योत्सवो महानासीद्राष्ट्रेप्या
मपुरादिषु॥ सीमंतिन्याः शुभाचारं शशंसुः सर्वतो जनाः॥६९॥ चित्रवर्मापि नृ
पतिः समाहूयेंद्रसेनकं॥ पुनरुद्वाहविधिना सुतां तस्मै न्यवेदयत्॥७०॥ चि
त्रांगदोपि रत्नौघैरानीतैस्तक्षकालयात्॥ स्वपत्नीं भूषयांचक्रे मर्त्यानाम
तिदुर्लभैः॥७१॥ अंगरागेन दिव्येन तदा कांचनरोचिना॥ सुस्नाने साधुगं
धेन दशयोजनगंधिना॥७२॥ मालयाम्लानया रम्यस्वच्छकिंजल्कवर्णया॥
कल्पद्रुमोत्थया बाला भूषिता सुशुभे सती॥७३॥ एवं चित्रांगदः पत्नीमवाप्य
समये शुभे॥ ययौ स्वनगरीं भूपः श्वसुरेणानुमोदितः॥७४॥ चंद्रसेनोपि राज्यस्थः

स्थाप्यराज्येस्वमात्मजं।तपसाशिवमाराध्यलेभेसंयमिनांगतिं।७५।दश
वर्षसहस्राणिसीमंतिन्यास्वभार्यया।सार्द्धंचेंद्रांगदोराजालेभेसंयमि
नांगतिं।७६।प्रसूततनयानष्टौकन्यामेकांवराननां।रेमेसीमंतिनीभर्त्रा
पूजयंतीमहेश्वरं।७७।विचित्रमिदमाख्यातंमयासमनुवर्णितं।भूयोपि
वक्ष्येमाहात्म्यंसोमवारव्रतोदितं।७८॥ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखं
डेसोमवारव्रतमाहात्म्यकथनंनामाष्टमोध्यायः॥ ॥ऋषयऊचुः॥ ॥
साधुसूतमहाप्राज्ञत्वयाकथितमुत्तमं।आख्यानंपुनरन्यत्त्वंविचित्रंवक्तु ८९
मर्हसि।१।सूतउवाच।विदर्भविषयेपूर्वमासीदेकोद्विजोत्तमः।देवमित्रइतिख्या

तोवेदशास्त्रार्थविच्छुद्धीः।२।तस्यासीदपरोविप्रःसर्वसारस्वताह्वयः।ता
वुभौपरमौस्निग्धावेकदेशनिवासिनौ।३।देवमित्रस्यपुत्रोभूत्सुमेधानाम
विश्रुतः।सारस्वतस्यतनयःसोमवानितिविश्रुतः।४।उभौसमरसौबालौ
समवेषौसमद्युती।समंचकृतसंस्कारौसमविद्यौबभूवतुः।५।सांगानधी
तौवेदास्तर्कव्याकरणानिच।इतिहासपुराणानिधर्मशास्त्राणिकृत्स्नशः।६।
सर्वविद्यासुनिष्णातौबालकौसमसिद्धिकौ।प्रहर्षमतुलंपित्रोर्ददतुःसकलै
र्गुणैः।७।तावेकदास्वतनयौतावुभौब्राह्मणोत्तमौ।आहूयावोचतांप्रीत्याषो
डशाब्दौशुभाकृती।८।हेपुत्रकौयुवांबाल्येकृतविद्यौसुवर्चसौ।वैवाहिकोहि

समयो वर्त्तते युवयोः समं।१९।एवं प्रसाद्य राजानं विदर्भेंद्रं स्वविद्यया। ततः
प्राप्य धनं भूरि स्वतोद्वाहौ भविष्यतः।२०।एवमुक्तौ स्वतात्मां च तावुभौ तौ द्विजनंद
नौ। विदर्भराजमासाद्य पर्यतोषयतां गुणैः।२१।विद्यया परितुष्टाय तस्मै द्विजकुमा
रकौ। विवाहार्थं कृतोद्योगौ धनहीनावशंसतां।२२।तयोरभिहितं श्रुत्वा स विदर्भ
महीपतिः। प्रहस्य किंचिद्योवाच लोकतत्वविविस्मया।२३।इतो निषधराजस्य रा
ज्ञी सीमंतिनी सती। सोमवारे महादेवं पूजयत्यंबिकायुतं।२४।तस्मिन् दिने स
पत्नीकान् द्विजाग्र्यान् वेदवित्तमान्। संपूज्य परया भक्त्या धनं भूरि ददाति च।२५।
अतोत्र युवयोरेको नारीविभ्रमवेषधृक्। एकस्तस्याः पतिर्भूत्वा जायेतां द्विजदंपती।२६।

युवां वधूवरौ भूत्वा प्राप्य सीमंतिनीगृहं। भुक्त्वा भूरि धनं लब्ध्वा पुनर्यातं ममांति
कं।२७।इति राज्ञा समादिष्टौ भीतौ द्विजकुमारकौ। वयं च तु इदं कर्म कर्तुं नो जाय
ते नयं।२८।देवतासु गुरौ पित्रोस्तथा राजकुलेषु च। कौटिल्यमाचरेन्मोहात्सद्यो न
श्यति सान्वयः।२९।कथं मंतिगृहे राज्ञां छद्मना प्रविशेत् पुमान्। गोप्यमानमपि व्यक्तं
कुत्रचिद्भानमेष्यति।३०।ये गुणाः साक्षिताः पूर्वं शीलाचारकृतादिभिः। सद्यस्ते विलयं
यांति कौटिल्यपथगामिनां।३१।पापं निंदा भयं वैरं च भायेता निदेहिनां। ब्रह्ममार्ग
प्रतिष्ठानां तिष्ठत्सेवहिनित्यव्रता।३२।अतस्त्रावांश्च भ्राचारौ जातौ च गुणिनां कुले। इदं
धूर्त्तजनश्लाघ्यं नाश्रयावः कदाचन।३३।राजोवाच। देवतानां गुरूणां च पित्रोश्च इ

थिवीपतेः॥ न्यासनस्यावलंघित्वात्त्वत्सादेवो न कर्हिचित्॥२४॥ एतैर्युक्तः समा
दिष्टः श्वभ्रं वा यदि वाशुभं॥ कर्त्तव्यो नियतं भीतैरत्र मंत्रैर्बुभूषिभिः॥२५॥ अहो व
यं हि राजानः प्रजापूज्यं समं गताः॥ राजाज्ञया प्रवृत्तानां श्रेयस्यादन्यथान्वयं॥२
६॥ अतो भवाशु सनं कार्यं भिवद्धाम विलंबितं॥ रत्नकोशेन देवेन तौ तथेत्यूचतुर्भ
यात्॥२७॥ सारस्वतस्य तनयं सोमवंतं नराधिपः॥ स्वरूपधारिणं चक्रे वस्त्र
कल्पांजनादिभिः॥२८॥ सकृत्रिमोद्यस्तनकेशबंधप्रकल्पाप्तकर्मभिरंगरागः॥
स्निग्धांगनाभिः स्पृहणीयरूपो बभूव सद्यः प्रमदोत्तमाभः॥२९॥ तावुभौ दंपती भू
त्वा द्विजपुत्रो नृपाज्ञया॥ जग्मतुर्नैषधेंद्राय द्वात द्यानवंचितौ॥३०॥ उपेतराज्ञः सदने ७१

सोमवारे सह द्विजैः॥ सपत्नीकौ कृतातिथ्यौ धौतपादौ बभूवतुः॥३१॥ सारा
सी ब्राह्मणान् सर्वान् सूपविष्टान् वरासने॥ प्रत्येकमर्चयांचक्रे सपत्नीका
न्महत्तमान्॥३२॥ तौ च विप्रसुतौ दृष्ट्वा प्राप्तौ कृत्रिमदंपती॥ ज्ञात्वा किंचिद्वि
हस्याथ मेने गौरीमहेश्वरौ॥३३॥ आवाह्य द्विजमुख्येषु देवदेवं सदाशिवं॥ पत्नी
ष्वावाहयामास देवीं च जगदंबिकां॥३४॥ गंधमाल्यैः सुरभिभिर्धूपैर्नीराजनैरपि॥
अर्चयित्वा द्विजश्रेष्ठान् नमश्चक्रे समाहिता॥३५॥ हिरण्मयेषु पात्रेषु पाय
संघृतसंयुतं॥ शर्करामधुसंयुक्तं शाकैर्जुष्टं मनोहरैः॥३६॥ गंधमाल्योदनैर्दि
ध्यैर्मोदकापूपराशिभिः॥ षट्कुलीभिश्च संयावैरुत्तारैः सोमपकाकैः॥३७॥ तथा

ब्रसो०
७२

न्यैरप्यसंख्यातैर्नैवेद्यैर्भोज्यैर्महारसैः।सुगंधैः स्वादुनिर्धूतैः पानीयैरपि
शीतलैः।३८।कृतमान्यद्विजाग्र्येभ्यः सान्यत्रापर्यतोषयत्।दध्योदनानि
रूपाणि निर्विद्य समतोषयत्।३९।भुक्तवत्सु द्विजाग्र्येषु स्नातां तेषु नृपांगना।
प्रणम्य दत्तां तां भूजं दक्षिणां च यथार्हतः।४०।धेनुं हिरण्यं वासांसि रत्न
स्रग्भूषणानि चादत्त्वा भूयो नम विसर्जं द्विजोत्तमान्।४१।तयोर्द्वयोर्भूसुर
वर्यपुत्रयोरेकस्तथा हैमवतीधियार्चितः।एको महादेवधिया निपूजितः।ह
तत्रणामो येय तु स्तदालयात्।४२।आवाह्य गिरिजां भक्त्या यस्तया पूजितः परः। ७२
सारस्वतद्विजसुतो बभूव प्रमदोत्तमा।४३।सानुविस्मृतपुंभावा तस्मिन्नेव द्वि

जोत्तमे।जातस्पृहा मदोन्मत्ता कंदर्प्पविवशाब्रवीत्।४४।एहि नाथ विशाला
क्षसर्वावयवसुंदर।तिष्ठ तिष्ठ क्व यासि मां न पश्य मितव प्रियां।४५।इदमग्रेव
नं रम्यं सुपुष्पितलतादुमं।अस्मिन्विहर्तुमिच्छामि त्वया सह यथासुखं।४६।इ
रुक्तं तस्याः कमाकर्ण्य पुरो गच्छद्विजोत्तमः।विचिंत्य परिहासोक्तिं गच्छन्निव तस्था
पुरा।४७।पुनरप्याह सा बाला तिष्ठ तिष्ठ क्व यास्यसि।ऊरू स्तह स्मह स्मरावेशात्प
रिरक्तामुपैहि मां।४८।परिष्वज्यस्व सा कांत पायय स्वतवाधरं।नाहं गंतुं समर्था
स्मि स्मरबाणेन ताडिता।४९।रक्षमस्कृतपूर्वंलां निःशंकः परिशंकितः।आयां
तीष्टष्टतो वीक्ष्य सह सा विस्मयं गतः।५०।एषा पश्य पलाशाक्षी पीनोत्तुंगपयोधरा।

कृशोदरी चहक्षोणी नवपल्लवकोमला ।५१। सरण्यमेसखा किंतु जाताएनव
रांगना । दृष्ठाम्येनामलः साधुभिः । तिसंचिंतसो ब्रवीत् ।५२। किमपूर्वरि वासा
सि सखे रूपगुणादिभिः ॥ अपूर्वैर्भाषसे वाक्यैः कामिनीवमदाकुला ।५३। पु
स्त्वंवेदपुराणज्ञो ब्रह्मचारी जितेंद्रियः । सारस्वतात्मजः शांतः कथमेवं प्रभा
षसे ।५४। इत्युक्ता सा पुनः प्राह नाहमस्मि मुमानृषिन्नो । नाम्नासोमवती बा
लवास्मि नृरतिदायिनी ।५५। यदि ते संशयः कांतमर्मांगानि विलोकय । इत्यु
क्तः सहसा मार्गे रहस्येनां विलोकयत् ।५६। तामकृत्रिमधम्मिल्लजघनस्त
नशोभिनीं । स्वरूपां वीक्ष्य कामेन किंचित्व्याकुलतामगात् ।५७। पुनः संस्तंभ
यत्नेन चेतसो विकृतिं बुधः ॥ मुकुंदैर्विस्मयाविष्टो न किंचित्प्रत्यु ॥ ओ॰१

डाक्टर भाऊदाजी इत्यस्य स्मारकम्
MEMORIAL

७३

भाषत ।५८। गलस्ते संशयः कश्चित्तद्यागच्छ रमस्व मां । पश्येदं विपिनं कांतं
परस्त्री सुरलोचितं ।५९। सुमेधाउ॰ ॥ ॥मैवं कथय मर्यादां माहिंसीर्ममवस्त्रिया
श्रावां वित्ता तयापन्थार्थोच्चमेवं भाषसे कथं ।६०। अपि तस्य च शास्त्रस्य विवेक
स्य कुलस्य च । किमेषः सदृशो धर्म्मो मार्गे निषेवणं ।६१। मा त्वं स्त्री पुरुषो वि
नूराज्ञात्यात्मा न मात्म ।ना। अयं स्वयकृतो नर्थो श्रावाम्यां यद्विचेष्टितं ।६२।
वंचयित्वात्मपितरौ धूर्त्तैर्राजानुशासनात् । कृत्वा चानुचितं कर्म तस्यैतद्दत्तं
यां ।६३। सर्वथानुचितं नृणां सर्वश्रेयो विनाशनं । यस्त्वं विप्रात्मजो विद्वानगत
विगर्हितं । मार्गस्य च्क्त्वा गतोरण्यं नरो विध्येत कंटकैः । बलाद्धिंस्यं तवा हिंस्त्रैः सदा

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

ब्रह्मो०
७४ त्सुसदागमः॥६५॥एवंविवेकमाश्रित्यसत्तूष्णीमेहिस्वकंगृहं।देवद्विजप्रसादेन
स्त्रीत्वंतवविलीयतां।६६।अथवैदैवेनयोगेनस्त्रीचमेवत्सवेत्सवा।अहोचित्रम
होदुःखंअहोमायाबलंमहत्।६७।अहोरात्तप्रभावोयंशिवाराधनसंभृतः।
इत्युक्त्वाप्यसकृत्तेनसावधूस्मरदुःखिता।६८।वज्रेनतंसमालिंग्यविचित्राध
रपल्लवं।धर्षितोपितयाधीरःसुमेधानूतनस्त्रिया।६९।यज्ञादानीयसद्द
हृत्स्नंतत्रनिवेदयेत्।तस्याकर्ण्याथितौविप्रौकुपितौशोकविक्लवौ।७०।ता
न्यांसहकुमाराभ्यांवैदर्भांतिकमाययुः।तत्रसारस्वतःप्राहराजानंधूर्त ७४
वेष्टितं।७१।राजन्ममात्मजंपश्यसमन्यासनयंत्रितं।एतौत्वदाज्ञावशगौचक्रतुः

कर्मगर्हितं।७२।मत्पुत्रस्तत्फलंभुंक्तेस्त्रीत्वंप्राप्यजुगुप्सितं।अद्यमेसंतति
र्नष्टानिराशाःपितरोद्यमे।७३।नापुत्रस्यलोकोस्तिनुसपिंडस्यसंस्कृतं।शि
खोपवीतमजिनंमौंजीदंडकमंडलुं।७४।ब्रह्मचर्योचितंचिह्नंविहायमां
दशांगतः।ब्रह्मसूत्रंचसावित्रींस्नानंसंध्याममार्चनं।७५।विसृज्यस्त्रीत्वमास
स्यकागतिर्वदपार्थिव।अद्यमेसंततिर्नष्टानष्टावेदाश्चयेमये।७६।एकात्मज
स्यमेराजन्कागतिर्वदशाश्वती।इतिसारस्वतेनोक्तंवाक्यमाकर्ण्यभूपतिः।७७।
सीमंतिन्याःप्रभावेनविस्मयंपरमंगतः।अथसवह्निंसमाहूयमहर्षीन्मित
द्युतीन्।७८।प्रसादयामासतस्यार्थंस्त्रंमहीपतिः।तेक्रवभयेपावत्सा

शिवस्य च समाहितं।७९। तद्भक्तानां च संकल्पं को न्यथा कर्तुमीश्वरः। अ
थ राजा भरद्वाजमाह स मुनिपुंगवं।८०। तावुभौ सहद्विजाग्र्यौ स सुताभ्यां
समन्वितः। अंबिकाभवनं प्राप्य भरद्वाजोपदेशतः।८१। तां देवीं नियमैस्ती
व्रैरुपास्ते स्म महानिशि।८२। एवं त्रिरात्रं स विसृष्टभोजनो जपार्चनध्यान
रतो महीपतिः सम्यक् प्रणामैर्विविधैश्च संस्तवैर्गौरीं प्रपन्नाः श्रीहिरामतोष
यन्।८३। ततः प्रसन्ना सा देवी भक्तस्यष्टघिवी पतेः। स्वरूपं दर्शयामास चंद्र
कोटिसमप्रभं।८४। अथाह गौरी राजानं किं ते ब्रूहि समीहितं। सोप्याह पुंस्त्व
मेतस्याः कृपया दीयतामिति।८५। भूयोप्याह महादेवी मद्भक्तैः कर्मणानेष्ट
यत्कृतं। शक्यते नान्यथा कर्तुं वर्षायुतशतैरपि।८६। एकात्मजो जिज्ञेशोयं कर्मणा नहि॥ ओ [७५]

स्तं तलिः। कथं सुखं प्रपद्येत विना पुत्रेण नाहं भूपालः।८७॥ ॥गौरीउवाच॥ ॥अस्या
न्नो मत्प्रसादेन भविष्यति सुतोत्तम। विद्याविनयसंपन्नो दीर्घायुरमलान्वयः।
।८८। एषा सोमवती नाम सुतास्य द्विजन्मनः। भूत्वा सुमेधसः पत्नी कामभोगेन
युज्यतां।८९। इत्युक्त्वांतर्हिता देवी ते च राजपुरोगमाः। गत्वा स्वं स्वं गृहं सर्वे चित्रकृत्स
च्छासने स्थितं।९०। सोपि सारस्वतः पुत्रं गुणवंतं सुतोत्तमं ते ते दैव्याः प्रसादेन
अचिरादेव कालतः।९१। एतां सोमवतीं कन्यां ददौ तस्मै सुमेधसः। तां दंपती चिरं
कालं बुभुजाते परं सुखं।९२। इत्येतच्छिवभक्तायाः सीमंतिन्याः नृपश्चिमः। जना
वः कथितः शंसो महात्म्यमपि वर्णितं।९३। भूयोपि शिवभक्तानां प्रभावं विस्मया

वहं। सहसा कथयिष्यामि श्रोतॄणां मंगलायनं।४४॥ ॥इति श्रीस्कंदपुराणे
ब्रह्मोत्तरखंडे नवमोध्यायः॥ ॥स्लो०॥ ॥विचित्रं शिवनिर्माणं विचित्रं शिव
चेष्टितं। विचित्रं शिवमाहात्म्यं विचित्रं शिवभाषितं।१। विचित्रं शिवभक्तानां चरि
तं पापनाशनं। स्वर्गापवर्गयोः सद्यः साधनं तद्ब्रवीम्यहं।२। अवंतिविषये कश्चि
द्ब्राह्मणो मंदारकाह्वयः। बभूव विषयारामः स्त्रीजितो धनसंग्रही।३। स संध्यास्ना
नपरित्यक्तो गंधमाल्यांबरप्रियः। कुस्त्रीसक्तः कुमार्गस्थो यथा पूर्वमजामिलः।४।
स वेश्यां पिंगलां नाम रममाणो दिवानिशं। तस्या एव गृहे नित्यं तिष्ठत्यविजितेंद्रि
यः।५। कदाचित्सदने तस्यास्तस्मिन्निवसति द्विजे। ऋषभो नाम धर्मात्मा शिवयोगी स

माययौ।६। तमारोप्य महापीठे कंबलांबरसंयुतं। प्रक्षाल्य चरणौ भक्त्या
तज्जलं दधतुः मूर्ध्नि।७। स्वागतार्घ्यनमस्कारैर्गंधपुष्पान्नतादिभिः। उपचारैः
समभ्यर्च्य भोजयामासतुर्मुदा।८। तं भुक्तवंतमाचांतं पर्यंके सुखसंस्तरे। उपवि
ष्टं मुदायुक्तौ तांबूलं च प्रयच्छतां।९। पादसंवाहनं भक्त्या कुर्वंतौ देवनोदितौ।
प्रकल्पयित्वा शुश्रूषया प्रीणयामासतुश्चिरं।१०। एवं समर्चितस्ताभ्यां शिव
योगी महामतिः। अतिवाह्य निशामेकां ययौ प्रातस्तदाश्रमात्।११। एवं काले
गतप्राये स विप्रो निधनं गतः। सा च वेश्या मृता काले ययौ कर्मार्जितां गतिं।१२।
स विप्रः कर्मणा नीतो दशार्णधरणीपतेः। वज्रबाहोः कुटुंबिन्याः सुमत्या गे

र्भमाश्रिता॥२३॥ तां ज्येष्ठपत्नी नृपतेर्गर्भवासं समाश्रितां। अवेक्ष्य तस्यै गर
लं सपत्न्यः क्षुब्धनाददुः॥२४॥ सा भुक्त्वापि गरं घोरं न मृता दैवयोगतः। क्लेश
मेव परं प्राप मरणादपि दुःसहं॥२५॥ अथ काले समायाते पुत्रमेकमजीज
नत्। क्लेशेन महता साध्वी पीडिता वरवर्णिनी॥२६॥ स निर्दग्धो राजपुत्रः स्पृ
ष्टपूर्वो गरेण यत्। तेनावाप महाक्लेशं रुदमानो दिवानिशं॥२७॥ स बालकश्च
मातापि सर्वांगव्रणसंकुलौ। बभूवतुरतिक्लिष्टौ गरयोगप्रभावतः॥२८॥ तौ
राज्ञा समयातौ तौ वैद्यैश्च कृतभेषजौ। अस्वस्थमापतुर्यत्नैरनेकैर्योजि
तापधि॥२९॥ न बालो लभते निद्रां सा राज्ञी विपुलव्यथा। स्वपुत्रस्य च दुःखेन दुः

खिता नितरां कृशा॥३०॥ नीचैवं कतिचिन्मासान् स राजा मातृबालकौ। जीवंतौ
च मृतप्रायौ विलोक्य भृशमचिंतयत्॥३१॥ इतो मे गृहिणी पुत्रौ निरयागगला
विहा। अहर्निशं तरोगौ क्रंदंतौ निद्राभंगविधायिनौ॥३२॥ मम दुर्वाजी वित्तं वापि नस्त
मौ पापभोगिनौ। अत्रोपायं करिष्यामि पापयोः शीघ्रमेतयोः॥३३॥ इत्थं विनि
श्चित्य स भूमिपालः सक्तः सपत्नीसुतदात्मजेषु। आहूय सूतं निजदारपुत्रौ नि
र्यापयामास रथेन दूरं॥३४॥ तौ मूलेन परित्यक्तौ कुत्रचिद्विजने वने। अवापतुः
परां पीडां क्षुत्तृष्णाभ्रमशावि कृतौ॥३५॥ सोद्वहंती निजं पुत्रं निपतंती पदे पदे। निः
श्वसंती निजं कर्म निंदंती च रुदंत्यभृशं॥३६॥ क्वचिल्लकं वकिमिन्नांगी मुक्तकेश्या

नयाहृता। क्वचिद्व्याघ्रस्थाने नीता क्वचिद्व्यालै रनुद्रुता॥२७॥ तर्ज्यमानापि
शाचैश्च वैतालैर्ब्रह्मराक्षसैः। महागुल्मेषु धावंती भिन्नपादा नुरक्तमिन्नि॥२८॥
एवं घोरे महारण्ये भ्रमंती नृपगेहिनी। दैवात्प्राप वणिग्मार्गं गोवाजिनरसं
विलं॥२९॥ गछंती तेन मार्गेण सुदूरमपि यत्नतः। ददर्श वैश्यनगरं बहुस्त्रीनर
शोभितं॥३०॥ तस्य गोप्ता महावैश्यो नगरस्य महाधनः। आस्ते पद्मकरो नाम स
जराजरवापच॥३१॥ तस्यै वैश्यपतेः काचित् गृहदासी वरांगना। आयांती दूर
तो दृष्ट्वा तदंतिकमुपाययौ॥३२॥ साहासी नृपतेः कांतां सपुत्रां भृशतापितां। स्व
यं विदितवृत्तांतां स्वामिनं प्रत्यदर्शयत॥३३॥ स तां दृष्ट्वा विशां नाथो रुजार्तां कि

ष्टपुत्रकां। नीत्वा रहसि सुव्यक्तं तद्वृत्तांतमपृछत॥३४॥ तया निवेदिताशेषवृत्तांतः
स वणिक्पतिः। अहो कष्टमिति ध्यात्वा निराश्वासन्मुहुर्मुहुः॥३५॥ तामंतिके स्व
गेहस्य सन्निवेश्य रहोगृहे। वासोन्नपानशयनैर्मातृसाम्यमपूजयत॥३६॥ तस्मि
न्गेहे नृपवधूर्निवसंती सुरक्षिता। व्रणग्रस्मादिरोगाणां न शांतिं प्रत्यपद्यत॥३७॥
ततो दिनैः कतिपयैः स बालो व्रणपीडितः। विलंघितभिषक्सत्वो ममार च विधेर्व
शात्॥३८॥ मृते स्वतनये राज्ञी शोकेन महता रुदत्॥ मूर्छितापोलयक्षूमौ गजस्नेव व
ल्लरी॥३९॥ दैवात्संज्ञामवाप्याथ बाष्पक्लिन्नपयोधरा। सांत्विता पि वणिक्स्त्री
भिर्विललाप सुदुःखिता॥४०॥ हा तात पुत्र हा बाल हा मम प्राणरक्षक हा राज

कुलपूर्णेंदोहाममानंदवर्द्धिनी॥४१॥रमामनाथांकृपणां त्यक्त्वाणांत्सबांधवां।
मातरं त्वंपरित्यज्य क्वयातोसिनृपात्मज॥४२॥इत्यादिभिर्हीनतरैर्वाक्यैःशो
कविवर्द्धनैः॥विलपंतीमृतापत्यांकोनुसांत्वयितुंक्षमः॥४३॥एतस्मिन्समये
तस्याःदुःखरोगचिकित्सकः॥ऋषभःपूर्वमाख्यातःशिवयोगीसमाययौ॥४४॥स
योगीवैनृपनाथेनसार्घ्यहस्तेनपूजितः॥तस्याःसकाशमागत्यशोचंतीमिद
मब्रवीत्॥४५॥ऋषभउवाच॥अकस्मात्किंमहावत्सेरौरवीषिविमूढधीः॥कोजातः
प्रथमीस्त्रोकोमृतोवदचसांप्रतं॥४६॥अमीदेहाह्यखोनावास्तोयफेनसमूर्मिणः॥
कश्चिद्यांतिकश्चिज्जातिकश्चिदुद्यंतिवापुनः॥४७॥अतोस्मिन्फेनसदृशेदेहेपंचत्वमागते।

शोकस्यानवकाशत्वान्नखिद्यंतिविपश्चितः॥४८॥गुणैर्नृणांनिसृज्यंतेत्रा
म्यंतेनिजकर्मभिः॥कालेनाद्यविकर्षंतेवासनायांवशीरता॥४९॥मायया
स्तिमायांतिगुणाःसत्वादयस्त्रयः॥तैरेवदेहाजायंतेजालक्षणाश्रयाः॥५०॥
देवत्वंयातिसत्वेनरजसाचमनुष्यतां॥तिर्यक्त्वंतमसाजंतुर्वासनानुगतोव
शः॥५१॥संसारेवर्त्तमानेस्मिन्जंतुःकर्मानुबंधनात्॥दुर्विभाव्यांगतिंयांतिसु
खदुःखमयीमुहुः॥५२॥अपिकल्पायुषांवत्सेदेवानामपिकल्पितः॥अपायः
कर्मबद्धानांकाकथानरदेहिनां॥५३॥केचिद्वदंतिदेहस्यकालमेवविकारणां क
र्मकेचित्गुणान्केचित्देहःसाधारणोह्ययं॥५४॥कालकर्मगुणाधीनेपं

वात्मकमिदंवपुः।जातंदृष्ट्वानरुष्यंतिनशोचंतिमृतंबुधाः।५५।अव्यक्तात्का
यतेजंतुरव्यक्तेत्वेवलीयते।मध्येव्यक्तइवद्राग्जातिजलबुद्बुदसन्निभः।५६।य
दागर्भगतोदेहीविनाशःकल्पितस्तदा।दैवाज्जीवतिवाजातोम्रियतेसहवै
वहि।५७।गर्भस्थाएवनश्यंतिजातमात्रास्तथापरे।केचिद्युवानोनश्यंति
म्रियंतेकेपिवार्धके।५८।यादृग्यांशाकुनेकर्मतादृग्यांविंदतेवपुः।भुंक्तेतद
नुरूपाणिसुखदुःखानिदेह्यसौ।५९।मायानुभावेरितयोःपित्रोःसुरतसं
गमात।देहानुपूर्वयतेकायंपूर्ययोषित्सुजीवलक्षणं।६०।आयुःसुखंचदुः
खंचपुण्यंपापंकृतंधनं।ललाटेलिखितंधात्रासहजंतुःप्रजायते।६१।कर्मणा

नविलंघितस्त्वाकालस्याप्नोतिसबलः।अनित्यत्वाच्चभावानांनशोकंकर्तुम
र्हसि।६२।कस्मंचन्नेनियतंस्थैर्यमिंद्रजालेक्षसत्ता।कनिलताश्रावन्मेघेकत्रए
श्वसंकल्पेवरे।६३।तवजन्मान्यतीतानिशतकोट्यसुतानिच।अज्ञानंत्वाःप
रंतत्त्वंसंत्रासोयंमहद्भ्रमः।६४।कस्यकस्यासितनयाजननीकस्यकस्यवा।
कस्यकस्यासिगृहिणीनवकोटिषुवर्तिनी।६५।पंचभूतात्मकोदेहःचर्मगर्भा
संबंधनः।मेदोमज्जास्थिनिचितोविण्मूत्रश्लेष्मभाजनः।६६।शरीरांतरमध्ये
तन्निजदेहोह्रुवंबलं।मत्वास्त्वतनयंमूढेमाशोकंकर्तुमर्हसि।६७।यदिनामजनः
कश्चिन्मृत्युंतरतियत्नतः।कथंनप्रतरेतीहपूर्वेपूर्वेविपश्चितः।६८।तपसावि

छयाबुध्या मंत्रौषधिरसायनैः॥ अतीयाति परं मृत्युं न कश्चिदपि पंडितः॥ दृष्टा।
नमृत्युर्नाद्यिवा जन्म परश्वो वा वरानने। तस्माद्दनिसेवयत्नेन त्वं शोचितुमर्ह
सि।७०।नित्यं संनिहितो मृत्युः किं सुखं वद देहिनां। व्याघ्रे पुरः स्थिते ग्रासः पु
ष्टानां यदि रोचते।७१। अहो जन्म मृती जेतुं यदिच्छसि वरानने। शरणं व्रज सर्वे
शं मृत्युंजयमुमापतिं।७२। तावन्मृत्युभयं घोरं तावन्मृत्युजराभयं। यावन्नो
पैति शरणं देही शिवपदांबुजं।७३। अनुभूय दुःखानि संसारे नृदारुणे।
मनो यदि विरज्येत तदाध्यायेन्महेश्वरं।७४। मनसा पिबतः पुंसः शिवध्यान
रसामृतं। भूयस्तृष्णा न जायेत संसारविषयासवे।७५। विमुक्तः सर्वसंगस्य

मनो वैराग्ययंत्रितं। यः शिवपदे मग्नं तदायात्यपुनर्भवं।७६। तस्मादिदं म
नो भद्रे शिवध्यानैकसाधनं। शोकमोहसमाविष्टमाकुरुष्व शिवं भज।७७।सू
त उ०।इत्थं सानुनयं साध्वी बोधिता शिवयोगिना। ब्राह्मणी च ह्यगुणैस्तस्य प्रण
म्य चरणांबुजं।७८।राज्ञ्युवाच॥ ॥भगवन्मृतपुत्रायास्त्यक्तायाः प्रियबंधु
भिः। महारोगातुरायामे का गतिर्मरणं विना।७९। अतोहं मर्तुमिच्छामि सहैव
शिशुनामुना। कृतार्थास्मि यदद्याहमपश्यमरणोन्मुखी।८०। इति तस्या व
चः श्रुत्वा शिवयोगी दयान्वितः। पूर्वोपकारं संस्मृत्य समेत्तस्यांतिकमाययौ।
।८१। स तदा भस्मसंगृह्य शिवमंत्राभिमंत्रितं। विदार्य तन्मुखे क्षिप्त्वामृतं

प्राणैरयोजयत् ।८२। स बालस्संगतः प्राणैः शनैरुन्मील्य लोचने । प्राप्तस
र्वेंद्रियबलो रुरोद स्तन्यकांक्षया ।८३। मृतस्य पुनरुत्थानं वीक्ष्य बालस्य
विस्मिता । जना मुमुदिरे सर्वे नगरेषु पुरोगमाः ।८४। अथानंदबलाद्राज्ञी
विकलोन्मत्तविभ्रमा । जग्राह तनयं शीघ्रं बाष्पव्याकुललोचना ।८५। उप
गुह्य रुदाल्लक्ष्मी परमानंदनिर्वृता । न वेदात्मानमन्यं च सुषुप्ते च परिश्रमात् ।८६।
पुनश्च ऋषभो योगी तयोर्मातृकुमारयोः । विषदग्धं तदेहं तस्मानैवय
दास्त्रभातु ।८७। तौ तदा तस्य मनाः स्पष्टौ आसतुर्दिव्यकलेवरौ । देवानां सदृशं
रूपं दधतुः कांतिभूषितं ।८८। सं प्राप्तौ दिव्यैश्वर्यं यत्सुखं पुण्यकर्मणां । त

स्माच्छतगुणं प्राप्य स्माराज्ञां सुखमुत्तमं ।८९। तौ पादयोर्निपतितौ ऋषभः
प्रेमविह्वलौ । उत्थाप्याश्वासयामास दुःखैर्मुक्तमुवाच ह ।९०। अपि वत्स
दशाब्दीजीवत्वं प्राप्स्यसी समाः । यावज्जीवति लोकेस्मिन् तावत् प्राप्स्यसे जसो
।९१। एष ते तनयः साध्वी भद्रायुरिति नामतः । ख्यातिं यास्यति लोकेषु नि
जराज्यमवाप्स्यसि ।९२। अस्य वैरूपस्य नगरे तावत्तिष्ठस्तु विस्मिता । यावद्दे
वकुमारस्ते प्राप्त दीर्घो भविष्यति ।९३। इतिता ऋषभो योगी तं च राजकुमा
रकं । संजीवयन्नस्म वीर्यं गायत्री देशान यथोसितानु ।९४॥ ॥इति श्रीस्कंदपुरा
णे ब्रह्मोत्तरखंडे द्वादशमोध्यायः॥ ॥स्तत३०॥ ॥पिंगला नाम या वेश्या मया पू

ब्रह्मो०
८३

वं सुहृत्कृता। शिवनक्षार्चनात्पुण्यात्त्यक्त्वा पूर्वकलेवरं॥१॥ चंद्रांगदस्य सा नृ
पस्य सीमंतिन्यामजायत। रूपौदार्यगुणोपेता नाम्ना वै कीर्तिमालिनी॥२॥
अनयोरपि तत्रैव राजपुत्रो वणिक्पतेः। व वृधे सदने तस्य वैश्यस्यापि महाम
ते॥३॥ तस्यापि वैश्यपनाथस्य कुमारोऽतीव चोत्तमः। स नाम्ना सुनयः प्रोक्तो राजसू
नोः सखाऽभवत्॥४॥ तावुभौ परमस्निग्धौ राजवैश्यकुमारकौ। विक्रीडतुस्सु
दारांगौ रत्नमंडितमंडितौ॥५॥ तस्य राजकुमारस्य ब्राह्मणैः स वणिक्पतिः
संस्कारान्कारयामास स्वपुत्रस्यापि विस्तरात्॥६॥ काले कृतोपनयनौ गुरु
शुश्रूषये रतौ। चक्रतुः सर्वविद्यानां संग्रहं विनयान्वितौ॥७॥ अथ राजकुमार ८३

स्य प्राप्ते षोडशहायने। सहर्षोऽऋषभो योगी तस्य वेश्म समाययौ॥८॥ सा
राज्ञी स्वकुमारश्च शिवयोगिनमागतं। मुहुर्मुहुः प्रणम्योच्चैः पूजयामास
सुमुदा॥९॥ तान्तां संपूजितश्चात्र योगीशो रुष्टमानसः। गतं राजपुत्रमुद्दिश्य
बन्धावेक करुणार्द्रधीः॥१०॥ शिवयोग्युवाच॥ ॥ कच्चित्ते कुशलं तात त्वन्मा
श्चाप्यनामयं। कच्चिच्च सर्वविद्यानामकार्षः प्रतिसंग्रहं॥११॥ कच्चिद्गुरूणां
सततं शुश्रूषापरमो भवान्। कच्चित्स्मरसि मां तात तव प्राणसमं गुरुं॥१२॥
एवं वदति योगीन्द्रे सा राज्ञी विनयान्विता। स्वपुत्रं तस्य पदयोर्निपात्येदमभाष
त॥१३॥ एष वत्सस्त्व गुरो त्वमसि प्राणदः पिता। एष शिष्यस्त्वया ग्राह्यो भवता

डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL

करुणात्मना।१४। अतो बंधुनिरुद्रुष्टमनाथं परिपालय। अस्मै सम्यक्
सतां मार्गमुपदेष्टुं च मर्हसि।१५। इति ब्रह्मसादितो राज्यपात्रा वियोगी महापे
तिः। तस्मै राजकुमाराय सन्मार्गमुपदिष्टवान्।१६।। ।।त्रपवाउ०।। ।।श्रुति
स्मृतिपुराणेषु प्रोक्तो धर्मः सनातनः। वर्णाश्रमानुरूपेण निषेव्यः सर्वदा
जनैः।१७। नजवक्रस्सतां मार्गं तिदेव च रिति चर। तदेव शात्विकत्वेष्य माका
र्षी देवहेलनं।१८। गोदेवगुरुविप्रेषु भक्तिमान् भव सर्वदा। चांडालमपि सं
प्राप्तं सदा संभावयातिथिं।१९। सत्यं मा त्यज सर्वत्र प्राणेष्वपि प्राणसंकटे। ८४
गोब्राह्मणानां रक्षार्थमसत्यं वा वद क्वचित्।२०। परस्वेषु परस्त्रीषु देवब्रा

ह्मणवस्तुषु। दृष्टिं त्यज महाबाहो दुर्लभेष्वपि वस्तुषु।२१। सकषायां स
दाचारो सद्भूतेषु सदागम। धर्मादि संभहे नित्यं यत्नं कुरु महामते।२२। स्ना
स्नाने जपे च होमे च स्वाध्याये पितृतर्पणे। गोविप्रातिथिपूजासु निरालसो
भवानघ।२३। क्रोधं रोषं च शाठ्यं च पैशून्यमसहायहं। कौटिल्यं दंभमुद्वेगं
यत्नेन परिवर्जयेत्।२४। कृतघ्न धर्मरतोपि त्वं दृथा हिंसा परित्यज। शुष्कवैरं
वृथालापं परनिंदां च वर्जय।२५। मृगया द्यूतपानेषु स्त्रीषु स्त्रीविजितेषु च।
अत्यासक्तिं च माकार्षीस्तथा दुर्विनयेषु च।२६। मैत्रीं कुरु सुखाढ्येषु दुःखि
तेषु दयां कुरु। पुण्यपरेषु च संतोषमौदासीन्यं कुबुद्धिषु।२७। असाहारम

तिक्रोधमतिर्निंद्रामतिश्चर्मं।अत्पालापमतिक्रीडांसर्वदापरिवर्जयात्२८।
अतिविद्यामतिक्रीडमातिपुण्यमतिस्मृतिं।अस्तुसाहमतिख्यातिमतिधै
र्यंचसाधय।२९।सकामोनिजदारेषुसंक्रोधोदुष्टशत्रुषु।अलोभःपुण्य
निचयेष्वभ्यसूयोप्यधर्मिषु।३०।सद्वेषोनवषंडेषुसंरागःसज्जनेषुचाद्गु
बेध्यिनवदुर्मंत्रबधिरःपिशुनोक्तिषु।३१।धूर्तंषंढंपरंक्रूरंकितवंचप
लंखरं।पतितंनास्तिकंजल्पंदूरतःपरिवर्जयेत्।३२।आत्मप्रशंसामाका
र्षीरविश्वासोजितोनवा।कुटुंबपुत्रेपित्रेषुनासासक्तःसदानवा।३३।पत्न्याप
तिव्रतायाश्चजनन्याःश्वसुरस्यच।सतांगुरोश्चवचनेविश्वासंकुरुसर्वदा।३४। ८५

आत्मरक्षापरोनित्यमप्रमत्तोहठव्रतः।विश्वासंनैवकुर्वीथाःस्वच्छत्स्वे
पिकुत्रचित्।३५।विश्वासंमावदेकांश्चिदपिचारमहामते।अपापेषुनशंके
थाःसत्मान्नचलितोनवा।३६।अनाथंकृपणंवृद्धंस्त्रियंबालंनिरागसं।परि
रक्षधनैःप्राणैर्बुध्याशक्तिबलेनच।३७।अपित्रातुंवधस्यार्हंमावधीःशरणं
गतं।अप्पपात्रंचपात्रंवानीचोवापिमहत्तमः।३८।योवाकोवापियाचेत
तस्मैदेहिशिरोपिवा।अपियत्नेनमहताकीर्तिमिवंसदार्जय।३९।राज्ञांच
विदुषांचैवकीर्तिरेवहिभूषणं।सकीर्तिःअनवालक्ष्मीपुण्यंतत्कीर्तिसं
भवं।४०।सकीर्त्याराजतेलोकचंद्रश्चंद्रिकयायथा।गजाश्वहेमनिचयंरत्नंचै

वनगोपमं।४१।अकीर्त्यपिहतंसर्वंहित्वावस्तुचसत्वरं।मातुःकोपंपितुःको
पंगुरोःकोपधनव्ययं।४२।पुंस्नीतामपराधंचक्षमस्वब्राह्मणानयं।यथाद्वि
जाः।।ऋसीदेषुतथातेषांहितंचर।४३।राजानंसंकटेमग्नमुद्धरेद्युद्धिजोत्तमाः।आ
युर्यशोबलंसौख्यंधनंशौर्यंद्विजोन्नतिः।४४।कर्मणायेननजायेततत्सेव्यंनव
तानघ।देशंकालंचशक्तिंचकार्यंचाकार्यमेवच।४५।सम्यग्विचार्यकार्या
णियत्नेनकुरुसर्वदा।नकुर्यात्कस्यचित्पीडांपरबाधांनिवारय।४६।चौर्यं
हर्षंचशत्रुंवाबाधेथाःशक्तिमत्तया।स्नानेजपेचहोमेचदैवेपित्र्येचकर्मणि।
।४७।त्वरांनकुर्यान्निद्रायांभोजनेनवसत्वरः।दाक्षिण्ययुक्तमनसंनजसत्वम

नासदा।४८।अश्लीलंमधुरंचैवसत्यंजनमनोहरं।अल्पाक्षरमनेकार्थंवा
क्यंब्रूहिमहामते।४९।अतीतोनवसर्वत्रविपत्सुचविपत्सुच।भीतोनव
भवत्कुलेनपापेगुरुशासने।५०।ज्ञातिबंधुषुमित्रेषुनार्यायांचतथैवच।
सर्वभावेनवर्तेथास्तथावैजनपंक्तिषु।५१।सतांहितोपदेशेषुतथापुराण
कथासुच।विद्यागोष्ठीषुधर्मेषुकदाचिन्माभूःपराङ्मुखः।५२।शुचौपुराणजन
स्थानेप्रख्यातेब्रह्मसंकुले।महादेवेशिवमयेवस्तव्यंभवतासदा।५३।सदा
शुचिःसदादक्षःसदाशांतिःसदास्थिरः।सदाविजितषड्वर्गःसदैकांतोनवा
नघः।५४।विप्रान्वेदविदःशांतान्यतीश्चनियमोद्धलान्।पुराणवक्तॄन्

ब्रह्मो०
८७

पुण्येनद्यांपुण्यतीर्थेमहत्सरः।५७।धेनुंवृषभंरत्नंयुवतींचपतिव्रतां।आ
त्मनोगृहदेवानिसहसैवनमस्कुरु।५८।उत्थायसमहाब्रह्मस्वाचांतोवि
न्यासाश्रायः।नमस्कृत्यात्मगुरवेध्यायेद्देवमुमापतिं।५९।नारायणंचल
क्ष्मींगौरींब्रह्माणींचविनायकंस्कंदंकात्यायनींदेवींमहालक्ष्मींसरस्वतीं।६०।इं
द्रादीनष्टलोकेशान्पुण्यश्लोकान्कर्कटर्षीनपि।चिंतयित्वाथमातॄंश्चउ
मुद्यंतप्रणमेत्सदा।६१।गंधपुष्पंचतांबूलंशाकंपक्वफलादिकं।शिवाय
दत्वाभुंजीतस्वस्वपश्चात्पूज्यंत्रियंनवं।६२।यदुक्तंयत्कृतंजप्तंयत्स्नातं—चर ८७
षकृतं।यच्चतत्सकलंततःसर्वंतच्छिवायनिवेदय।६३।भुंजानःपर्यटंस्तिष्ठन्

शयानोविहरन्नपि।पश्यन्शृण्वन्गृणन्सर्वंशिवमेवानुचिंतय।६४।
रुद्राक्षकंकणलसत्करदंडयुग्मोभालांतरालधृतभस्मसितत्रिपुंड्रः।पंचा
क्षरंपरिपठन्वरमंत्रराजंध्यायेत्सदापशुपतेश्वरमेषाः।६५।इतिसंक्षे
पतोवत्सकथितोधर्मसंग्रहः।अन्येषुचपुराणेषुविस्तरेणप्रकीर्तितः।
६६।अथापरंसर्वपुराणगुह्यंनिःशेषपापौघहरंपवित्रं।जयप्रदंसर्व
विपद्विमोचनंवक्ष्यामिशैवंकवचंहितायते।६७।इतिश्रीस्कंदपुराणेब्र
ह्मोत्तरखंडेशिववर्मक्रिममहिमानंऐकादशोऽध्यायः॥ ॥ऋषभउवाच॥
नमस्कृत्वामहादेवंविश्वव्यापिनमीश्वरं।वक्ष्येशिवमयंवर्मसर्वरक्षाक

तं त्वरण्यं ॥ २ ॥ शुचौ देशे समासीनो यथावत्कल्पितासनः ॥ जितेंद्रियो जितप्रा
णश्चिंतयेच्छिवमच्युतं ॥ ३ ॥ कृत्सुं डरीकांतरसंनिविष्टं स्वतेजसा व्याप्तनभो
वकाशं ॥ अतींद्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्सदानंदमयं हृदिस्थं ॥ ४ ॥ ध्यात्वा
च धूताखिलकर्मबंधश्चिरं चिरानंदनिमग्नचेता ॥ ष उज्ज्वलं तमा ससमाहि
तात्मा त्रैलोक्य रक्षाकवचेन कुर्यात ॥ ५ ॥ मां पातु देवो खिलदेवतात्मा तं नाम
माघं वर मंत्र मूलं ॥ धूनोतु मे सर्वमघं रुद्रस्थं सर्वत्र मां रक्षतु विश्व
मूर्तिः ॥ ज्योतिर्मयानंदघनश्चिदात्मा अणोरणीयानुरुशक्तिरेकः ॥
सरेश्वरः पातु भयादशेषात्सूक्ष्मस्वरूपेण बिभर्ति विश्वं ह्यपायात्स ८८

मेसोरकूपेपतितं गभीरे ४

भूमे गिरिशो ष्टमूर्तिः स्वपांस्वरूपेण नृणां करोति ॥ संजीवनं सो वतु मां र
जलेभ्यः कल्पांत [redacted] सोनेभुवनानि दग्ध्वा [redacted] स कालरूपो चतुर्दशानां
[redacted] भीते रखिलां चिंतापातु ॥ प्रदिप्त विद्युत्कनकावभासो विद्यावराभीति
तिकुठारपाणिः [redacted] चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितो रक्षतु मा
मजस्रं ॥ कुठार [redacted] वेदांकुशपाशशूलकपालढक्काक्षगुणं दधानः ॥ [redacted] चतु
र्मुखो नीलरुचिस्त्रिनेत्रः पापाद घोरो दिशिदक्षिणस्यां ॥ कुंदेंदुशंखस्फटिका
वदालो वेदाक्षमाला वरदाभयांकः ॥ [redacted] अक्षश्चतुर्वक्त्र उरु प्रभावः सद्यो
धिजातो वतु मां प्रतीच्यां ॥ वराक्षमालाभयटंकहस्तः स रोजकिंजल्कस

मानवर्णः।[redacted]त्रिलोचनश्चास्तुचतुर्मुखो मांपायादुदीच्यांदिशिवामदेवः।
वेदात्मपेक्षांकुशपाशटंककपालढक्काक्षत्रिशूलपाणिः।[redacted]शीतद्युति
:पंचमुखोवतान्मामीशानऊर्ध्वंपरमप्रकाशः।मूर्धानमव्यान्ममचंद्रमौ
लिर्भालंममाव्यादथभालनेत्रः।[redacted]नेत्रेममाव्याद्भगनेत्रहारीनासांस
दारक्षतुविश्वनाथः।पायाच्छ्रुतीमे श्रुतिगीतकीर्तिः।कपोलमव्यात्स
कपालमाली।[redacted]वक्त्रंसदारक्षतुपंचवक्त्रोजिह्वांहरोरक्षतुवेदजिह्वः।
कंठंगिरिशोवतुनीलकंठः पाणिद्वयंपातुपिनाकपाणिः।[redacted]दोर्मूलम
व्यान्ममधर्मबाहुः[redacted]वक्षस्थलंदक्षमखांतकोव्यात्।ममोदरंपातुगि ८९

कुबेरमित्रोजानुद्वयंपुंगवकेतुरव्यात्।जंघायुगेचैवगदीश्वरोव्यात्पादौममाव्यात्सुरवंद्यपादः।१८।महेश्वरःपातुम

रिध्वधूर्वामध्यंममाव्यान्मदनांतकारी।[redacted]हेरंबतातोममपातुनाभिंपा
यात्कटिंधूर्जटिरीश्वरोमे।ऊरुद्वयंपातुदिनादियामेमांमध्ययामेवतु
वामदेवः।१९।मांत्र्यंबकःपातुतृतीययामेवृषध्वजःपातुदिनांत्ययामे।पाया
न्निशादौशशिशेखरोमांगंगाधरोरक्षतुमांनिशीथे।गौरीपतिःपातुनि
शावसानेमृत्युंजयोरक्षतुसर्वकाले।१९।अंतस्थितंरक्षतुशंकरोमांस्था
णुःसदापातुबहिस्थितंमां।२०।तदंतरेपातुपतिःपशूनांसदाशिवोरक्षतु
मांसमंतात्।तिष्ठंतमव्याद्भुवनादिनाथःपायाद्व्रजंतंप्रमथाधिनाथः।
२१।वेदांतवेद्योवतुमांनिषण्णंमामव्ययःपातुशिवःशयानं।मार्गेषु

ब्रलो०
९०

मांरक्ष्तुनीलकंठः शैलादिभृंगेषुपुरत्रयारिः॥२२॥ अरण्यवासादिमहाप्र
वासेपायात्मृगव्याधउदारशक्तिः कल्पांतकोटोपपटुःप्रकोपःस्फुरदृहासोच
लितांडकोत्रः॥२३॥ घोरारिसेनार्णवदुर्निवारान्महाभयादृक्षतुवीरभद्रः॥ प्रत्यप्रव
माथंगघटावरूपसहस्रलक्षायुतकोटिभीषणांग॥२४॥ अक्षौहिणीनांशतमातता बिनाभिघाय र्डारकुठारधार याभिहर्तुं शत्रु न्यल्पानजोस्ति तेतिम्रेहतेन्नि पुरं
तकस्मात्स्यात्रौत्यहन्निसिद्धिरष्टकादिहिंस्त्रात्सत्रासयन्नीषधनुःपिनाकः॥ दुःस्वप्नदुः
शकुनदोर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥२६॥ उत्पातत्रणपविषं
भीतिमसग्रहार्तिंव्याधिंचनाशयतुमेजगतामधीशः॥ ॐ नमो भगवते सदाशिवा
यसकलतत्वात्मकायसकलतत्वविहारायसकललोकैककर्त्रेसकललोकैकभर्त्रेसक ९०

ललोकैकहर्त्रेसकललोकैकगुरवेसकललोकसाक्षिणेसकललोकनिगमगुह्यायस
कललोकवरप्रदायसकलालोकदुःखत्रिभंजनायसकललोकैकशंकराय॥सकललो
कैकत्रारणायत्राशांकत्राकेराय॥शाश्वतनिजवासाय॥निर्गुणायनिरूप
मायनिःप्रपंचायनिरामासायनिःकलंकायनिरातंकायनिर्द्वंद्वायनिःसं
गायनिरूपमविभवायनिराधारायनित्यशुद्धपरिपूर्णसच्चिदा
नंदाद्वयपरमशांतप्रकाशतेजोरूपायविभवायनिराधारायनि॥ यजयजम
हारुद्रमहारौद्रदुःखदारुणाभद्रावतारमहाभैरवकल्पांतभैरवकाल
भैरवकपालमालाधरखट्वांगचर्मपाशांकुशडमरुशूलचापबाणगदाशक्ति

भिंडिमालतोमरमुसलमुद्गर परिघभुशुंडिशतघ्नीचक्रायुधभीषणकरस
हस्रमुखदंष्ट्राकरालविकटाट्टहासविस्फारितब्रह्मांडमंडल नागेंद्रकुंडल नागेंद्रहार नागेंद्र
वलय नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक विरूपाक्ष विश्वेश्वर २ वृष
वाहन विषविभूषण विश्वतोमुख सर्वतो रक्ष २ मां ज्वल २ महामृत्युभयं नाशय
२ सर्वरोगभयमुत्सादय २ विषसर्पभयं शमय २ चोरान्मारय २ शत्रूनुच्चाट
य २ त्रिशूलेन विदारय २ कुठारेण भिंधि २ खड्गेन छिंधि २ खट्वांगेन विपोथ
य २ मुसलेन निष्पेषय २ बाणैः संताडय २ रक्षांसि भीषय २ भूतानि वि
द्रावय २ कूष्मांडवेतालमारीगणब्रह्मराक्षसान् संत्रासय २ ममाभ

यं कुरु २ वित्रस्तमाम्श्वासय २ नरकभयान्मामुद्धर २ संजीवय २ क्षुत्तृड्भ्या
मामाप्यायय २ दुःखातुरं मानंदय २ शिवकवचेन मामाच्छादय २ नमस्ते
नमस्ते नमस्ते। ऋषभ उवाच ॥ इत्येतत्कवचं दिव्यं परमं व्याकृतं मया। सर्व
बाधाप्रशमनं रहस्यं सर्वदेहिनां। २७। यः सदा धारयेन्मर्त्यः शैवं कवचमु
त्तमं। न तस्य जायते क्वापि भयं शंभोरनुग्रहात्। २८। क्षीणायुः प्राप्तमृत्युर्वा
महारोगहतोपि वा। सद्यः सुखमवाप्नोति दीर्घमायुश्च विंदति। २९।
सर्वदारिद्र्यशमनं सौमंगल्यविवर्धनं। यो धत्ते कवचं शैवं स देवैरपि पूज्य
ते। ३०। महापातकसंघातैर्मुच्यते चोपपातकैः। देहांते मुक्तिमाप्नोति शिवव

मनुभावतः।३१।त्वमपिश्रद्धयावत्सकवचंशैवमुत्तमं।धारयस्वमयादत्तंस
द्यःश्रेयोह्यवाप्स्यसि।३२।इत्युक्त्वाऋषभोयोगीतस्मैपार्थिवसूनवे।ददौशंखं
महानादंखड्गंचारिनिषूदनं।३३।पुनश्चभस्मसंमंत्र्यतदंगंपरितोमृशन्।ग
जानांषट्सहस्राणांद्विगुणस्यबलंददौ।३४।भस्मप्रभावात्संप्राप्यबलैश्व
र्यधृतिस्मृतिः।सराजपुत्रःशुशुभेशरदर्कइवश्रिया।३५।तमाहप्रांज
लिंभूयःसयोगीनृपनंदनं।एषखड्गोमयादत्तस्तपोमंत्रानुभावतः।३६।सित
धारमिमंखड्गंयस्मैदर्शयसिस्फुटं।ससद्योम्रियतेशत्रुःसाक्षान्मृत्युहतःस्व
यं।३७।अस्यशंखस्यनिनादंयेशृण्वंतितवाहिताः।तेमूर्छितापतिष्यंतिन्यस्तशस्त्रा

विचेतनाः।३८।शंखखड्गौमहादिव्यौपरसैन्यविघातिनौ।आत्मसैन्यस्वरूपाणां
शौर्यतेजोविवर्द्धनौ।३९।एतयोश्चप्रभावेनकवचेनच।द्विषट्सहस्रनागबलेनम
हतापिच।४०।भस्मधारणसामर्थ्याच्छत्रुसैन्यंविनन्नृपते।प्राप्यसिंहासनंपै
त्र्यंगोप्तासिपृथिवीमिमां।४१।इतिभद्रायुषंसम्यगनुशास्यसमातृकं।ताभ्यांसं
पूजितःसोथयोगीस्वैरगतिर्मुनिः।४२।इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशि
ववर्मकथनंनामद्वादशोऽध्यायः॥१२॥सूतउवाच॥दशार्णाधिपतेस्तस्य
वज्रबाहोर्महीभुजः।बभूवशत्रुर्बलवान्राजामागधराष्ट्रपः।१।सवैहेम
रथोनामबाहुशालीरथोत्कः।बलेनमहतासदशार्णानभ्यरुणद्बली।२।च

श्रत्रो० ९३

नृपास्तस्य उ र्धर्षाः श्राप्य देशोद्यानीकं ।। वलुपन्चसु रत्नानि गृहाणि द्रक्रः परे ।। ३ ।। केचिद्धनानि जगृहुः केचिद्बालांस्त्रिगोधनं ।। केचिदारामसस्यानि गृहोद्यानान्यनाशयन् ।। ४ ।।
एवं विनाश्य नगरं स्त्रीगोधनजिघृक्षवः ।। आययुस्तस्य नगरीं वज्रबाहोस्तु मागधाः ।। ५ ।।
एवं पर्याकुलं वीक्ष्य राज्यं नगरमेव च ।। युद्धाय निर्जगामाशु वज्रबाहुः ससैनिकः ।। ६ ।।
वज्रबाहोश्च भूपालस्तथा मंत्रिपुरःसराः ।। युयुधुर्मागधैः सार्द्धं निघ्नतो रिपुवाहिनीं ।। ७ ।।
वज्रबाहोर्महेष्वासो दंशितो रथमास्थितः ।। चिकार तु बाणवर्षाणि चकार कदनं महत् ।। ८ ।।
द्वादशास्य रिपोः पुत्रस्तं देश्य युद्धे सुदुःसहं ।। तमेव तमसा वव्रुः सर्वे मागधसैनिकाः ।। ९ ।।
कुलं गुणैः सुत्तिरयुद्धं मागधा दृढविक्रमाः ।। तस्य नन्दनाग्र्याः मासुलेभिरेव जय श्रि

यं ।। १० ।। केचिच्चिच्छिदुस्तस्य रथं जघ्नुः केचित्तु तुरगान्नतः ।। सूतं तस्य जघानैकस्तस्य पु[illegible]
र्ष्टमाविनत ।। १ ।। स च्छिन्नधनुश्चापे नेरविरथं हतसारथिं ।। बलाद्गृहीत्वा [illegible]
नो बबंधुर्नृपतिं रुषा ।। ११ ।। तस्य मंत्रिगणं सर्वं तस्मै सैन्यं च विजित्य ते ।। मागधा
स्तस्य नगरीं विविशुर्जितकाशिनः ।। १२ ।। अश्वान् गजान् रथान् हत्वा वसुधा[illegible]
धनानि च ।। जगृहुर्युवतीः सर्वाः श्वावंगीरपिकन्यकाः ।। १३ ।। राज्ञो वरो क्षमहिषीं दा[illegible]
श्चैव सहस्रशः ।। कोशांश्च रत्नसंपूर्णं जगृहुः श्वात तायिनः ।। १४ ।। एवं विनश्य नगरी
नरसस्त्रीगोधनादिकं ।। वज्रबाहुं बलात् बद्ध्वा स्वराष्ट्रं प्रविनिर्ययुः ।। १५ ।। एवं कोला
हले जाते राज्ञो नारी सुदारुणे ।। राजपुत्री थ भद्रायुस्तस्य कान्ता दपतद्वली ।। १६ ।। पि[illegible]

डाक्टर भाऊदाजी इस्मारकसंग्रह
Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इस्मारकसंग्रह
Dr. BHAU DAJI MEMORIAL

ब्रह्मो०
९४

रंध्रान्नुनिबद्धं पित्रपत्नीस्तथाहताः॥ नष्टं दृष्ट्वा पुरीराष्ट्रं च श्रुत्वा चुक्रोश सिंह
वत्॥१७॥ सशंखरवखड्गमादाय वैश्यपुत्रसहायवान्॥ कुमारो हयमादाय दं
शितो विजिगीषया॥१८॥ जवेनागत्य तं देशं मागधैरावृतं तदा॥ राज्यमानं कंद
मानं दृष्ट्वा तत्स्त्रीगृहगोधनं॥१९॥ दृष्ट्वा राष्ट्रजनं सर्वं राजशून्यं भयावहं॥ क्रोधाध्मा
तमनाः शूरः प्रविश्य रिपुवाहिनीं॥२०॥ आकर्णकृष्टकोदंडो ववर्ष शरसंततिं॥ ते
हन्यमाना रिपवो राजपुत्रेण सायकैः॥ २१ तमतिद्रुतवेगेन शरैर्विव्यधुस्तु च
ते॥ हन्यमानोऽस्त्रवेगेन रिपुभिर्युद्धदुर्मदैः॥२२॥ न चचाल रणे धीरः शिववर्मा ९४
भिरक्षितः॥ सोऽस्त्रवर्षं प्रगृह्याशु जवीन्नृपगजलीलया॥२३॥ अघानाश्वान्नरथान्न
गाम्दातीनथकोटिशः॥

तत्रैव नृपतिं हत्वा सस्थूलं नृपनंदनः॥२४॥ तमेव रथमास्थाय वैश्यपनंदनसार
थिः॥ विचचार रणे धीरः सिंहो मृगकुलं यथा॥२५॥ अथ सर्वेषु संरब्धाः शूराः प्रोद्य
तकार्मुकाः॥ अभिसस्रुस्तमेवैकं च भूपा बलशालिनः॥२६॥ तेषामापततामग्रे
षड्गमुद्यम्य दारुणं॥ अभ्युद्ययौ महावीरो दर्शयन्निव पौरुषं॥२७॥ कृत्वा रोतक
जिह्वाभं तस्य षड्गं महोज्वलं॥ दृष्ट्वैवं सहसा मम्रुश्च भूपास्तत्र नावतः॥२८॥ येये
पत्रं पततं खड्गं प्रस्फुरं तं रणांगणे॥ ते सर्वे निधनं जग्मुर्वह्निं प्राप्येव कंटकाः॥२९॥
अथासौ सर्वसैन्यानां विनाशाय महाभुजः॥ शंखं दध्मौ महारावं पूरयन्नि
व रोदसी॥३०॥ तेन शंखनिनादेन विमाहेनैव भूयसा॥ श्रुतमात्रेण रिपवो मूर्छिता

ब्रह्मो०
९५

न्यपतन्भुवि।३१।येश्वपृष्टेरथेयेचयेचदंतिषुसंस्थिताः।तेपिसंत्रास्त
तृणेनत्येतुःखंरवनादृहतौजसः।३२।तान्भूमौपतितान्सर्वान्नष्टसंज्ञान्नि
रायुधान्।विगण्यनृपत्रायान्प्रवक्षीद्धर्मशास्त्रवित्।३३।आत्मनःपि
तरंबद्धंमोचयित्वारणाजिरे।तत्सर्वाःशत्रुबद्धागाःसर्वाःसद्योव्यमोचयत्।
।३४।पत्नीश्चमंत्रिमुख्यानांतथान्येषांपुरौकसां।स्त्रियोबालाश्चकन्याश्च
गोधनानित्यनेकशः।३५।मोचयित्वारिपुभयात्समाश्वासयदातुरं।तेरि ९५
सैन्येषु—परंषाकुत्राहयोषितः।३६।मरुन्मनोजवांश्चाश्वान्मातंगानगि
रिसंनिभान्।स्यंदनानिचरौक्माणिदासीश्चरुचिराननाः।३७।सर्वमाकृत्सवेगे

नगृहीत्वाचक्षनंबऊमागधेश्वरंहेमरथंनिर्बधंपराजितं।३८।तन्मंत्रिणस्तत्रनृ
पांस्तत्रमुख्यांश्चनायकान्।गृहीत्वातरसाबद्धापुरंप्राविशदाप्यचमं।३९।पूर्वं
येसमरेभग्नाविद्रुताःसर्वतोदिशं।तेमंत्रिमुख्याअश्वस्ताःनायकाश्चसमाय
युः।४०।कुमारविक्रमंदृष्ट्वासर्वेविस्मितचेतसः।तंमेनिरेसुरश्रेष्ठंकारणाद्दागतं
भुवं।४१।अहोनःसुमहद्भाग्यमहोनःसुमहत्फलं।केनाप्यनेनवीरेणमृताःसंजी
विताःपुनः।४२।एषकिंयोगसिद्धोयंयोगीवाथामरस्तथा।अमानुषमिदंकर्मय
देनेनकृतंमहत्।४३।नूनमस्यजनन्याताःसागौरीसशिवःपिता।अतोहिणीनांन
वकंजघानानंवकंजघानानंतशक्तिधृक्।४४।रसाश्चर्ययुतेरुष्टैःप्रशंसद्भिःपर

अस्तो०
९६ स्परं। अष्टोमासज्जने नासावात्मानं आहत ततः॥४५॥ सोन्यागतस्तत्पितरं विस्म
याक्रांदविह्वलं मुंचंतमानंदजलं ववंदे प्रेमविह्वलः॥४६॥ सराजा निजपुत्रेण
प्रणयादभिवादितः। आश्लिष्य गाढं तरसा बभाषे प्रेमकातरः॥४७॥ कस्त्वं दे
वो मनुष्यो वा गंधर्वो वा महामते। का माता जनकः को वा को देशः स्तव नाम किं।
।४८। कस्मान्नः शत्रुभिर्बद्धान्मृतानिव हतौजसः॥४९॥ कारुण्यपादिह संप्राप्य
सपत्नीकान्व्यमोचयन्। कुतो लब्धमिदं शौर्यं धैर्यं तेजो बलोन्नतिः॥५०॥ जिगी
षुः सर्वलोकांस्त्रीन्सदेवासुरमानुषान्। अपि जन्मसहस्रेण तवानृण्यं महोज ९६
सः॥५१॥ कर्तुं नाहं समर्थोऽस्मि सहेभिर्दारिबांधवैः। इमान्पुत्रानिमाः पत्नीरिदं राज्य

मिदं पुरं॥५२॥ सर्वं विहाय मच्चित्तं त्वय्येव प्रेमबंधनं। सर्वं कथय मे तात मत्त्राणप
रिरक्षक॥५३॥ एतासां मम पत्नीनां त्वदृधी नहि जीवितं॥ सूत उ०॥ इति पृष्टः स भ
द्रायुः सोपि सत्यमभाषत॥५४॥ एष वै नृपसुतो राजन्नतुसुतयो नाम मस्त्वा अह
म्स्य गृहे रम्ये वसामि सह मातृकः॥५५॥ भद्रायुर्नाम मम वृत्तं पश्चाद्विज्ञापयामि
ते। पुरं प्रविश्य नृपनंदं तेस दारः ससुरूजनः॥५६॥ स्वकांत्वानय मरातिभ्यो विहरस्व
यथासुखं। नैतान्मुंचरिपूंस्तावद्यावदागमनं मम॥५७॥ अहमद्य गमिष्यामि शी
घ्रं मातुर्निवेशनं। इत्युक्त्वा नृपमामंत्र्य भद्रायुर्नृपनंदनः॥५८॥ आजगाम स्वजव
नमात्रे सर्वमन्यवेदयेत्। सातिरुष्टा स्वतनयं परिरेभेऽश्रुलोचना॥५९॥ स च वैश्यप

ब्रलो॰
९८

लिः प्रेम्णा समाश्लिष्य पास्यपूजयत्॥ वज्रबाहुश्च राजेंद्रः प्रविष्टो निजमंदि
रं। ६०॥ स्त्रीपुत्रामात्यसहितः प्रहर्षमतुलं ययौ। तस्यां निशायां व्युष्टायां
रूषभो योगिनां वरः। ६१॥ चंद्रांगदं समागत्य सीमंतिन्याः पतिं नृपं॥ भद्रायु
षः समुत्पत्तिं तस्य कर्माण्यमानुषं। ६२॥ आवेद्य रहसि प्रेम्णा तत्सुतां कीर्त्तिमालि
नीं॥ भद्रायुषे प्रयच्छेति बोधयित्वानु नैषधं। ६३॥ ऋषभो निर्जगामाशु देव्या
काव्यार्यतत्त्ववित्॥ अथ चंद्रांगदो राजा मुहूर्ते मंगलान्विते। ६४॥ भद्रायुषं
समाहूय प्रायच्छत् कीर्त्तिमालिनीं। कृतोद्वाहः स राजेंद्रः कुमारः सहभार्यया। ९७
६५॥ हेमासनस्थः शुशुभे रोहिण्येव निशाकरः॥ वज्रबाहुस्तत्पितरं समाहूय

स नैषधः॥ ६६॥ पुरंध्रवेश्मप सामात्यं प्रत्युत्थाप्याभ्यपूजयत्॥ तत्रापश्यत्
कृतोद्वाहं भद्रायुषमरिंदमः॥ ६७॥ पादयोः पतितं प्रेम्णा हर्षात्तं परिषस्व
जे॥ एष मे प्राणदो वीर रेष शत्रुनिबर्हणः॥ ६८॥ असाध्य तात वंशोयं यथानं
तपराक्रमं॥ ॥वज्रबाहुरुवाच॥ ॥एष ते नृप जामाता त्वं चंद्रांगद महाबलः॥
६९॥ अस्य वंशमयोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः॥ स्फुटं दत्ताश्च दाराः वैश्यात्रिर्गतो नि
षधाधिपः॥ ७१॥ विविक्त उपसंगम्य प्रहसन्निदमब्रवीत्॥ एष ते तनयो राज
न् रोगार्तो वैरोगपीडितः॥ ७२॥ त्वया वने परित्यक्तः सह मात्रा रुजार्तया॥ परिभ्रमं
ती विपिने सा नारी शिशुना सह॥ ७३॥ दैवाद्वैश्यपगृहं प्राप्ता तेन वैश्येन रक्षिता॥

अथासौ बकुरोगार्त्तो मृतः स च कुमारकः ।७४। केनापि योगिना राजन् मृत
संजीवितः पुनः ।ऋषभाख्यस्य तस्यैव प्रभावाद्धि योगिनः ।रू पंचदेव सह
स्रांश्च शौमान् कुमारको ।तेन दत्तेन षड्गेन शंखेन रिपुघातिना ।७६। जगाम स
मरे शत्रून् शिवधर्माभिरक्षितः ।द्विषद् सहस्रनागानां बलमेको बिभर्त्ति सो ।
।७७। सर्वविद्यासु निष्णातो मम जामातृ साधकः ।अत एनं समादाय मातरं च
स्य सुव्रता ।७८। गच्छ त्वं नगरं राजन् आस्य सिंहेपय उत्तमं ।इति चित्रांगदः
सर्वमाख्याकांत गृहे स्थितं ।७९। तस्यैव पत्नीमाज्ञ्यद र्शयामास नृपितां ।र ९८
स्यादि सर्वमाकर्ण्य दृष्ट्वा स वमहीपतिः ।८०। प्रीतितो नितरां मोदयाश्चर्य तं कर्म

गर्हयत् ।प्राप्तश्च परमानंदं तयोर्हृदि शाति कौतुकं ।८१। पुलकांकितस
र्वांगिता बुधो परिषस्वजे ।एवं निषधराजं च पूजित श्वाभिनंदितः ।८२। संमो
जयित्वा तं सम्यक् स्व स्थं जातः समं श्रिभिः ।तामात्म त्वजायां च तं पुत्रं ताम
पि स्नुषां ।८३। आदाय परिवारो वा वज्रे बाहुः पुरीयये ।ससैन्य मेणमहता
न श्रेयुः पितृ मंदिरं ।८४। संप्राप्य परमानंदं चक्रे सर्वपुरोकसां ।कालेन दिव
मारूढे पितरि प्राप्तयौवनो ।८५। नराः युः पृथिवीसर्वं त्रिशाशासाद्गुतत्रासनश्रमा
गधेशांहे मरथं मोचयामास बंधनात् ।८६। संक्षयमैत्रीपरमां ब्रह्मर्षीणां च सन्नि
धौ ।८७। स्वकं त्रिलोकमहितां श्रीचयोगि पूजां कृत्वा पुरातनभवे पि स राजसूनुः ।

निस्त्रीयद्भिः सहविपक्षेण मासराज्यःस्वंड्गं गदस्यसुतयासह साधुरेमे।
।८८।। ।।इतिश्रीस्कंदपुराणे अस्तोत्तरषंडे नडायुश्चरितं नाम त्रयोदशोध्या
यः।। ।।सूत उ०।। ।।आसीत्सिंहासनो वीरो नडायुः स महीपतिः।अविवेकमव
नं रम्यं कदाचित् प्रियया सह।१।सहंतस्मिन् विकचाशोकप्रसूननवपल्ल
वाशोकफुल्लमल्लिकाखंडे कूजद्भ्रमरसंकुले।२।नवकेसरसौरभ्यलुब्ध
गिजनोत्सवे सद्यःसरकिताशोकमालगहनांतरे।३।प्रसूतचकयनंतमा
धवीनवमंडपे।प्रवालकुसुमद्योतनूतनशाखाभिंसिते।४।पुन्नागवन
विभ्रांतपुंस्कोकिलविराविणि।प्रवालकुसुमद्योतनूतनशाखाभिंसिते।४।

पुन्नागवनविभ्रांतपुंस्कोकिलविराविणि।वसंतसमये रम्ये विजहार प्रि
यं नरः।५।अथागात् गह्वरेकं हंतौ द्वौ द्विजदंपती।अन्वीयमानौ व्याघ्रे
ण दद्दर्श नृपसत्तमः।६।पाहि पाहि महाराज त्वं नाथ करुणानिधे।एषअ
यातिशार्दूलो जग्धुमावां महारयः।७।एष पर्वतसंकाशः सर्वप्राणिभयंकरः।
यावन्नषादति ह्यावां तावन्नो रक्ष हे नृपते।८।इत्यमाकर्ण्य दिलं कृत्वा स राजा धनु
राददे।तावदस्मे त्समागत्य शार्दूलो मध्ये जग्राह तां वधूं।९।हा नाथ नाथ हा कांत हा शं
भो हा जगद्गुरो।इति तां रुदमानां तां व्याघ्रो जग्राह भीषणः।१०।तावत्स राजा निशि
तैर्निर्दैर्व्याघ्रमताडयत्।न च ते विस्मये किंचित् गिरी इव वृष्टिभिः।११।सभा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ईदृशो महासत्वो राजस्त्वैरं कुलक्षयः। बलाद्याकृष्यते नारी मया क्रामन्नसत्वरः
।२२। व्याघ्रेणोपकृतो पत्नी वीक्ष्य विप्रो ति दुःखितः। हतो हहा प्रिये बाले ह्यकां
ते हा पतिव्रते ।२३। मामेकमिह संत्यज्य कथं लोकान्तरं तो गता। प्राणेभ्योपि प्रि
या त्यक्त्वा कथं जीवितुमुत्सहे ।२४। राजपुत्रे महास्त्राणि धृतेष्वाद्यं महत्वनुः।
धृते द्वादशसाहस्र महानागालिंगबलं ।२५। किं ते खड्गेन चर्मणा खेन किं ते मन्त्रा
स्त्रविद्यया। किं सत्वेन प्रतापेन किं प्रभावेन नृपसा ।२६। तत्सर्वं विफलं जातं
यद्भार्या व्याघ्रपिलिष्टति। यस्त्वं वनौकसं जंतुं न निवारयितुं क्षमः ।२७। क्षत्रस्या
यं परो धर्मः कृतार्थ्य परिरक्षणं। तस्मिन्कुलोचिते धर्मे नष्टे तज्जीवितेन किं ।२८।

आर्त्तानां त्रारणात्त्रानां त्राणं कुर्वंति पार्थिवाः। प्राणैरर्थैश्च धर्मज्ञास्तद्विही
ना मृतोपमाः ।२९। आर्त्तत्राणविहीनानां जीवितान्मरणं वरं। धनिनां दानहीं
नानां गार्हस्थ्यात्तु भिक्षुता वरं ।२०। वरं विषांशनं प्राज्ञै वरं मग्नो प्रवेशनं। अना
थानां जपन्नानां रक्षणं नाम रक्षणं तं ।२१। स्त्रं विलपितं तस्य स्वभार्यस्य च ग
र्हणं। निशम्य नृपतिः शोकात्स्वात्मन्येवमचिंतयत् ।२२। अहो मे पौरुषं नष्ट
मद्य दैव विपर्ययात्। अद्य कीर्तिश्च मे नष्टा पातकं प्राप्त मुत्कटं ।२३। धर्मः क्षा
त्रो न्वितो नष्टो मंद भाग्यस्य दुउर्मतेः। नूनंउर्मते। नूनं मे संपदो राज्यमायुष्य
क्षयमेष्यति ।२४। आयुंषि संपदो भोगाः पुत्रदारधनानि च। दैवेन क्षणमेव